तेस्वतंत्रः तत्कथंहृत्नावुक्तं स्वातंत्र्याभावादिति अशाह स्वा
त्मादिमतनभातमस्यावश्यं भातीति एतदेव वस्तुतत्त्वमुच्यते।
नतत्र किंचिन्नत् तत्त्वभवनमपि प्रकाशलग्नं सत्तथा भवती
ति भवनस्वातंत्र्येण प्रकाश एव घेत्तिणा किं करिष्यत इति प्र
काशेन तत्स्वदनावलोकितियत्स्वातन्त्र्यं तदेव स्वातंत्र्यमुच्यते
तच्च जडानां नास्तीति युक्तैव युक्तिः स्वातन्त्र्याभावादिति प्रका
शस्य च परदशायां चमत्कारमात्रात्मा यो विमर्शस्तदेव स्वातं
त्र्यं न त्विच्छारूपं परापरत्वे तु तदिच्छारूपमिष्यमाणोन्मेषा
त्. अपरदशायां तदेवापूर्णमिति दर्शयति प्रकाशोपीत्या
दिना चिकीर्षैवेत्यन्तेन चमत्कारो हीति स्वात्मन्यनन्यापे
क्षे विश्रमणं एवं भुंजानतारूपं चमत्त्वं तदेव करोति संरंभे
न विमृशति नान्यत्रानुधावति चमदिति क्रियाविशेषणं
अखंडएवं वा शब्दो निर्विघ्नास्वादनवृत्तिः चमदिति वा अन्त
रस्पन्दान्दोलनोदितपरामर्शमय शब्दनाव्यक्तानुकरणं
काव्यनाट्यरसादावपि भाविविघ्नहृत्यन्तरोदयनियमात्सं
कविघ्नविरहित एवास्वादो रसनात्मा चमत्कार इत्युक्तमन्यत्र
विश्वनिर्माणे त्विति व्यतिरिक्ताव्यतिरिक्तेष्यमाणतया श्री
सदाशिवादिभुवनान्त आरभ्याहम्भावाच्छादनस्वक्रमेण
संकोचक्रमोन्मेषचेदभावतारस्यस्यानेनादिविघेश्वरान्तमू
तथावस्थात्वपरापररूपतां दर्शयति भेदाभेदैककरणाव्य
वहाराभावात्. कृतमिति तद्व्यवहारभेदनिरूपावेवगाप्ता
यांब्रह्मादीनां कुलालादीनां च तदाहमायीयसर्गे इति तथेति सं
ऽचिद्रूपतायामपि ब्रह्मादेः कुविन्दादेश्च व्यतिरिक्तत्वेपीच्छा
माणस्यापारमित्यात्यारमित्यास्य विशेषणमाह एवमिति

मारणमूलेपरदृशायांनास्तीछाव्यवहारइतिशान्तशि-
वादिप्रवादाभिप्रायेणोक्ता सदाशक्तिरूपाविष्टएवशिव
इत्येवंभूतदर्शनाग्रयशिवदृष्टिमतावलम्बनेनाह अथवे
ति सर्वत्रहिचमत्कारएवेच्छासचपरभूमावप्यस्ति यदु-
क्तं तदेच्छातावतीति सेवहीति चमत्कारितादिभ्यज्ञानरू
पतास्वात्मविश्रांतिलक्षणासर्वत्रेच्छा क्वचित्तुस्वात्मवि
श्रांतिलक्षणासर्वत्रेच्छाभावात्तत्रमनागूरितविशेषमपे
क्ष्योन्याप्यते यत्रसेच्छारागइत्युच्यते अगूरितविशेषता
यात्तुकामइति आदिग्रहणादभिलाषमलोयत्रभावात्
तरेसामान्याकारमपिवासनावशेषमात्रेणास्ते यथाहभा
व[illegible]तानिजननान्तरसौहृदानीति ओत्सुक्यंचनित्यतत्स
[illegible]यानव्यपगतशंकानुविद्धैवेति एवमन्यदनुमतत्वं
तदभावश्चेति स्वातंत्र्याभावस्यनिमित्तमुक्तइच्छाभावइति
संगतिः इयताहात्रिरूभयथाप्यागमितावुभूषायोगेनयत्स्वातं
त्र्यतस्याभावात् अयोगेनचयःस्वातंत्र्याभावस्तत्रइति नन्वे
वंहिमवानस्तीतिकथं आह कर्तेतोपचारस्त्विति आरोप
णेनिमित्तं तत्पारतंत्र्यात्मकेनात्र्यनामेतपर्थः स्वातंत्र्यस्या
गम्यमानस्याप्यारोपणमित्यर्थार्थेभिधीयमानस्वातन्त्र्यारो
पेदृष्टान्तीकरोति कूलमित्यादिना आशंकायामचेतने-
ष्विति प्रत्याख्याते यद्वाकंनवातत्पकारणत्वादिच्छाया
दिप्रवृत्तिन उपलब्धिरिति तत्रप्रमात्रस्वातन्त्र्यारोपणमे
वतत्त्वमवसेयमित्याशयः ततएवेच्छासंभवएतत्त्वावसम
रूढंमत्वापरिहारान्तरमाख्यात् उपमानाद्वासिद्धमिति
ततृतीयमुनिनानासह्यत नर्निजान्तेनोपमानमस्तीति

प्र
वि
४८०
४८१

तदास्तामेवा ... सर्वपदेवेति नित्यप्रवर्तितां वर्तमानस्पद
र्शयन्मायाप्रमातृपेक्षमे तदुक्तमित्याशयं सूचयति सत्य
प्रमातृपेक्षयात्वनुपचरितमेवेदमित्याशयं सूचयति माया
प्रमातृपेक्षयात्वनुपचरितमेवेदमित्याह अपवेति मायी
यप्रमातृतापदेऽपि च सत्यप्रमातृत्वविरोध इत्याशयेनापि
शब्दं अंकुरपदेनाभूतप्रादुर्भावं पिशुनयति ममप्रमाते
ति मायाप्रमात्रुद्देशेनैवेदं सामर्थ्यं परमार्थप्रमातरि तु
न किंचिदत्र ब्रूयामित्याह ४ इत्थमिति सूत्रेऽर्थः स्पष्टः॥
सैव च क्रियाशक्तिरिति यदुक्तं तत्र कश्चिद्ब्रूयात् भगव
तीच्छा श्रीसदाशिवे ज्ञानशक्तिः ईश्वरभूमौ क्रियाशक्तिः
इत्यागमे शक्तिविभागस्तदेतत्कथं ... तत्राह विश्वाव
भासनेति चः शंकाद्योतकः न केवलं लोकप्रसिद्धा क्रि
यास्पन्दनरूपा यावदियमपीत्यपिः एवान्तेति हेतुहे
तुमद्भावद्योतको निपातो यद्यपि तथाप्येवमेतदर्थमूर्ती
वा क्रियायां शक्तिरित्येवं व्याख्याय सामानाधिकरण्य
मपि स्वाभिमतं व्याचष्टे तस्यामपीवेति शक्तिरिति क्रिया
त्मा यथोक्तं स्वस्वशक्तित्रितयसामरस्येन वर्तत इति
तत्स्वरूपेनेति चिद्रूपकर्तृस्वरूपेण यदाहुरिति वैयाकर
णाः एवं पूर्वाणश्चापरकारकपर्यायापायेऽपि सति क
र्तरि क्रियातत्त्वस्य दर्शनमसति त्वपरकारकसामग्र्याम
पि अदर्शनमित्यन्वयव्यतिरेकाभ्यां कर्तृविश्रान्तिरेव क्रि
येति निरूपितं भवति नेह पशपन इत्यादावप्यधिकरणा
तिमा पवपाकभोगादियोग्याभासान्तपवकर्तरोनवि
ति कर्मणः क्रियावेशो न संभवति॥

इच्छाविरहितत्वादिस्तु पचतीतः सः उपचारेण निमित्ते कर्तृ
गतयापि तथा कर्मतया हिताभिसंहितविशेषदर्शनं यदा
हेतुत्वा यद्वा कंपदितं तत्राह यांहेत्रो नास्ति संबंधिनीत्य
स्यपदस्यहेत्रावपाठादित्याशंक्याह शेष इति यथाहारव
त्यर्थः षष्ठ्येति हेतौ क्तया ततश्च साध्याहारमेतत्पठितं·
मित्युक्तं भवति करणादीनां चेति कारकत्वमिति संबंधः
ननु करोतीति कारकमिति कर्तृत्वमुत्पत्तिपदे सतं उपचा
रोवंरूपभावी अनुत्पन्नस्तु निमित्तपर्यायश्चत्र पदे किंतु
पचारेणेत्याशंकामपास्यति निमित्तत्वं चेति सदसत्कार्य
वादविचारे हि निराकृतः शुष्कः कार्यकारणभावः तेषा
मिति करणादीनां पतदिति निमित्तत्वं ततश्च काष्ठैः प
चतीत्यस्यांशपिदशायां संविन्नत्वातं व्यानुप्रवेशादेवका
रकत्वं नतन्यथा नत्ववयवक्रियायामस्येषां स्वातंत्र्य
काष्ठानि ज्वलन्तीति कर्तृत्वदर्शनात् ततश्च सायादाभा·
धानपाकलीनाविवक्ष्यते तदा करणत्वेपि कारकत्वमस्यका
त्वं उनेति किमत्र चिमत्वमुक्तिन पतदाशंक्याह काष्ठानी
ति निज्वलिषोरेवज्वालनकर्तृत्वं युक्तमित्यादि पूर्वोक्तव
दृष्टसत्यीयमिति शिवं ॥

इति श्रीमहामाहेश्वरश्रीमदाचार्याभिनवगुप्तविरचिता
यामीश्वरप्रत्यभिज्ञाविवृतिविमर्शिन्यां क्रियाधिकारे
कार्यकारणभावविमर्शश्चतुर्थः आदितः विमर्शः १२

समाप्तश्चायं क्रियाधिकारः ॥

ॐ नमः शिवाय ॥ ॐ येन प्रोतं सकलं विश्वास्ववसेन
शिवमयीकुरुते योन्तरथाभ्युदयन्त्ववयमः स्मरतनिषेव

नेतमस्मिन्नतः ॥ एवमधिकारद्वयेन निर्णीते चित्तत्त्वज्ञान
क्रिये अधुना तत्क्रियाधिकारे यदुक्तं विश्ववैचित्र्यचित्रस्य
त्मानो सर्वपदार्थावभासनिर्मललक्षणत्वमेव क्रियाश
क्तेः स्वरूपमिति तत्र कोऽसौ पदार्थवर्ग इति वक्तव्यं तत्रास्म
दादिप्रत्यक्षं नाशेषसाक्षात्कारि अनुमानमप्येवं सर्वस्य
लिंगव्याप्त्युपलब्धिसंभवाभावात् असंकुचितप्रकाशात्म
कपरमेश्वरविमर्शात्मकः पुनरागमो विश्वं प्रमातुं समर्थः
तत एव विवृतावतारीति पदार्थतत्त्वोपपादनार्थमिति पा
रमेश्वरागम एव तत्त्वमुपपादयितुं शक्तः युक्तिस्तु तदुपबृं
हणाय न च विश्वप्रमेयतापादनेनोपयोगि प्रकृतायामी
श्वरप्रत्यभिज्ञापनायां विश्वप्रमेयीकरणे हि तावत्प्रमेय
पदोत्तीर्णतावदन्तःकरणप्रतिलब्धपूर्णभावात्मप्रमा
तृता हृदयंगमीकृता भवेत् यदुक्तं दिष्ट्यैव सर्वार्था-
स्तदात्म्याव तिष्ठते तदा किं बहुनोक्तेन स्वयमेवावभा
स्यते इति समस्तं सपदीति पदेन बहुव्रीहिपदे प्रस्तावि
शेषणेन स्फुटीकृते समस्तस्य हि स्मृतिक्रियात्मनो दे
शकालप्रपंचस्य संविद्वभासनेन तदपरिच्छिन्नस्वभावा
सौ विभूतिरूपा सर्वशक्तिः स्वप्रकाशत्वेन निर्भासते
तदपि मायावरणात् अन्यथापि भायादिति तत्रापी-
श्वरागमशरणता तदुक्तं प्रमाणमेकं तद्वाक्यं तथ्यमी
श्वरभाषितं तस्योक्तिः पौरुषैः स्थूलैः प्रमाणैः न प्रबा
ध्यते तदनेनाशयेनागमाधिकार उच्यते तत्र श्लोकैका
दशकेन एवमन्तर्बहिरित्यादिना स्थूलसूक्ष्मत्वभेदतः
इत्यनेन शिवादिधरण्यन्तानां तत्त्वानां पारमेश्वरागमसिद्धं

युक्ताप्यनुसन्धानमात्रं प्रत्येकतः स्वरूपं दर्शयति तान्ये
व प्रमाणव्यापारविषयत्वादेकैकाभासरूपाणि वस्तूनि
येषां दर्शनान्तरेमान्यव्यवहारः तैरेव च नियतशक्त्युन्म
हस्तीव सामानाधिकरण्यवैयधिकरण्यवैचित्र्येणानन्त
स्वलक्षणावभासात्मकव्यूहविभवविशेषमयः शरीरभु
वनादिः समस्तोप्ययं सर्ग ओतप्रोत इति प्रकरणतात्पर्यं
तत्रोक्तार्थोपजीवनेनाधिकारसंगतिं कुर्वन्स्वं पल्लनिरा
क्रियांचोपसंहरं शिवतत्त्वमेव सर्वमेतदेव च सर्वभावा
नां तत्त्वमिति तदेवं तावज्ज्ञानक्रियायोगादाभासविम
र्शसारं स्वरूपमनयोर्दर्शयति ॥ एवमन्तर्बहिर्वृत्तिः क्रियाका
लक्रमानुगा मातुरेव तदन्योन्यावियुक्ते ज्ञानकर्मणीति
जडेप्रतिष्ठितः कार्यकारणभावो नोपपद्यते पितृवि
रूप एव प्रकाशविमर्शैकपरमार्थोपि स्वातन्त्र्यादन्तर्ब
हिरात्मावभासमानः कालक्रममनुत्या पर्येज्ञानशक्तिव
पुषाथमित्रूपः संस्तामन्तर्बहिरात्मतां क्रमिकावभासा
क्रियाशक्तिधर्मत्वेन स्वीकुरुते इत्येवं यदुक्तं तदिति
ततो हेतोरन्योन्यमवियुक्ते ज्ञानक्रिये प्रकाशविमर्शात्
मिके तदेव च सर्वभावानां पारमार्थिकं वपुस्ततः क्रि
याशक्तिद्वारस्वीकृतसकलकृत्यपञ्चकप्रपञ्चनस्वातन्त्र्य
भावनाद्युपयोगितयोपदेशेनाभास्यमानमवभासरू
पमपि शिवतत्त्वमित्युच्यते यथोक्तं स्वातन्त्र्यमुक्त
मिति तथा श्रीकिरणायां मायातीतं शिवं तत्त्वं
कथं तु त्वं मनोभुवि विभासेतेति प्रश्ने प्रथोव्याप्तिः
शिवस्यैव स्वप्रकाशस्य सेति निरूपितं स्वप्रकाशा

प्र
भि वि
४८९
489

ताहि स्वतंत्रता प्रयोगाभिसन्धाय सृष्टिरेवेति सूत्रार्थः विहृ
तिकारो ज्ञानक्रियाभूतानामिति पूर्वपक्षोपपत्ति स्वात्मनो
ऽवतनाभिज्ञानत्रूपं वक्तव्यं वस्तु समस्तमुक्तं तत्किमिदानी
प्रमेयान्तरमस्ति यदर्थमधिकारान्तरमिति पराशंकां हृ
दि गृहीत्वा प्रकरणार्थसंक्षेपेणावतारयति एवमित्यादि
नाउपदर्शयिष्यन्तेन प्रकृति संगतिं कुर्वता शंकाबीजमप्यु
पक्षिप्तं उपक्रमते इति वचसा सूत्रार्थोऽप्यवतारितः शिव
तत्त्वं हि सर्वपदार्थानां वपुस्तद्धि निष्ठेव सर्वभावविश्रान्ति
भास इति तदभिन्नमेव तेषामुपपादनोपक्रमः आगमस्य च
समस्तस्य तात्पर्येण शिवतत्त्वमेवार्थ इति भेदपासूत्राव
तारणं कृतमेवेति पूर्वशास्त्रमनुसृत्यैवावतारणिकायां
ननु कर्तुः क्रियेति समुचितं वक्तुं न तु प्रमातुः क्रियेति प्र
माह प्रवभासनेति बहिः सत्तादानं यद्यप्याभासनमेव त
थापि लौकिकसर्वप्रमातृसाधारणात्मपसंपादककाचरणा
दिव्यापारविशेषपर्यन्तीभूतमेवाभिप्रेतं तथा लौकिकार्थ
प्रसिद्धेः तामेव च संज्ञा ग्राहेन दर्शयति शिवतत्त्वलक्षण
स्य परप्रमातुरलौकिकत्वेन व्याकर्तुमशक्यतेत्याशयेन
यद्यपि मायीयप्रमातृत्वेन प्रमातृतत्त्वं व्याख्यातं तस्य
च न तत्त्वभुवनवर्गो निर्मेयस्तथापि मायाप्रमातृतत्त्वं शिव
तत्त्व एव प्रकारत्वेन सामान्यात्तदेकरूपत्वाच्चैवं पर्य
वसाययिष्यतीति तदभिप्रायेण तत्त्वादिग्रहणं आदि
पदेन च मायाप्रमात्रवभासनीयघटपटादिसंग्रह आ
त्मन इति हि तेन तत्त्वभुवनादयोऽर्थाः प्रमातृव्यतिरिक्तत्वाद्य
तो निर्दिष्टाः तत्र आत्मानमेव प्रमातृसंज्ञकर्तृभावेन

कर्तृभावेन चावलम्बमाना क्रिया कर्मस्थत्वेन कर्तृस्थत्वे
न वा विविच्यमाना एकाश्रयैव भवति वस्तुत एकैव घटा
वभासनस्य पटावभासनाद्धि न परमार्थतो भेदः घटपटयो
रेव बोधैकपरमार्थत्वेनाभेदात् मायाकृतं तद्भेदोपरागा
वभासितस्तु भवतु क्रियाणां भेद इति वस्तुस्थितिर्यद्रूणां
नन्ववभासमानपदार्थविषयं यत्तत्समर्थाचरणं प्रमातुः
सम्बन्धितज्ज्ञानविरहितं कस्मादन्यत्किंचिन्न भवेदित्याशं
क्याह बोधात्मेति बोधैकरूपस्य प्रमातुर्यदधिकमबोध
रूपं तन्निर्मीतव्यपदेनिर्दिष्यते इति तस्य च निजशक्ति
यधर्म इति व्यपदेश्यं नेहाथरूपमेव युक्तमिति यावत्
विशेषः कर्मएपधिकारोदीतासमर्चेन ध्यानादिक्रियासु
क्रमस्य वतत्वज्ञानसम्पत्तिरित्येतस्मिन्नर्थे यद्यप्ययमागमो
माख्यातः तथाप्ययमेवार्थ एतदर्थमूलत्वे सति युज्यते
अन्यथा ज्ञाने यदि क्रियाया उपयोगि तदस्तु क्रियात्वज्ञाने
वर्धयतीति कः प्रकारः भावनामात्रेणापि तत्सिद्धिदर्शनात्
यदा तु क्रियानामपरं तत्त्वमपि शारीरपर्यन्तो भावनदृढो
भूतो विमर्शः सकलमिदं घटमहमविरलेपवादिपरमेष
रेषु यस्तदभेदितया विमृशामीति पूजनं तदा युक्तमुच्यते
सर्वेना क्रियाविरहितेज्ञानेन दृढीभवतीति तथा च श्री
सदागमः योगो नान्यः क्रिया नान्या तत्त्वारूढा हि या मतिः
स्वचित्तवासनाशान्तौ सा क्रियेत्यभिधीयते इति मया च
वार्तिके एतद्व्याख्याने स्वाश्रितवासनाः कर्ममलमायाप्र
सूतयः तासां शान्तिनिमित्तं या मतिः संवित्स्वभावविकासा
देहारम्भिवाह्यस्थतत्त्वव्याप्तापि शायिनी क्रियासैव च या

प्र
भि वि
४५०
490

गोपितव्यानां चिन्मयीकृतेः लोकेपि किल गच्छामीत्येव
मन्तः स्फुरैव या सा देहमत्तं देशं चाप्याविशती गतिक्रिया
तस्मात्क्रियापि यानाम ज्ञानमेव हि सेति तदेतद्दर्शयति प
रस्पराविरह इत्यादिना ग्रन्थेनेति अपरस्परात्मतायां हि त
त्वशिंशापात्वयोरिव तादात्म्येभिधीयमाने परमार्थतो व्य
तिरेक एव आभासविमर्शभेदात् इति प्रतिपादयितुम
न्यथेति व्यतिरेक इति चोभयमुपात्तं यदि नामेति चेतन
स्यैव क्रियारूपो धावतीत्यादेः पुनरुपचार इति यदि मतं
तदेव स्ववचमित्याशयः ननु परमेश्वरस्य ज्ञानक्रिये भवे
तां परस्पराविरहिते बोधस्वभावो हि परमेश्वरः सततं
नवनवकृत्यपंचकावभासनास्वभावः पशुप्रमातॄणां
तु सर्वनिर्मितविश्ववर्तिनीलादिबोधावसरे नवावभास
रेन वावभासनानास्त्येव यतस्तिरोहरति मायेत्यादिना शु
द्धिनेत्यत्रावच्छेदः परस्पराविरहो युक्त इति च पूर्वेण सम्ब
न्धः तस्माच्छिवतादृप्यं यदैश्वर्यं न हि ज्ञानक्रियात्मकैश्वर्याति
रिक्ता चित्काचित् ननु स्वेन तद्रूपेण युक्तः पशूनामपि ज्ञा
नक्रिययोरन्योन्यावियोगः यत्रेश्वरविवेकः प्रेणवच्छि
दचिद्रूपाच्छिवादेको महेश्वरः तेन केचिद्विद्वांस्तु कथ
मालेपभूमय इति ननु भगवतोपि सदा कथं नावभासना
निर्वहति इति शंकां भिनत्ति नीलेमादिना यदि वा यत्सर्वं
समर्पितमीश्वरस्य तदैश्वर्यं पशुत्वेन मायाप्रमातॄणामपि नि
र्माणां समर्पितमित्येकस्यैव ग्रन्थो नेयः दृष्टो प्रमातृक्रि
येति संबंधे षष्ठी नत्ववहिष्कारापेक्षया कर्तरि नचापि नतिय
मेन निषेधः शेषे विभाषे विभाषेत्यप्यनुज्ञानात् यदि नसीं
भावप्रत्यय एव शेषः

स्वातन्त्र्येणैवेति ईश्वरस्य स्वानपेक्षतया निर्माणमिति समर्थि
तमिति संबंधः उक्तं हि यथाभिमतसंस्थानाभासनाद्बुद्धिगो
चरे अतएव यथाभीष्टेत्यादि ननु पशुप्रमात्रुपक्रमेण कि
मर्थो विचारः अत्राह शुद्धैश्वर्येति ननु परमार्थतो यदि एते
नातिरिच्यन्ते तत्किमिति रिक्ततया विचारेण अतिरिक्ततया
वभासमानानामत्यन्तमसंभविनीति दर्शयति केवलमिति
निर्मातृपदे इति मायीयानां कीटान्तानां स्वकार्यकारणा
वस्थेयत्कार्यं ग्राह्यं हृदये स्फुरति तच्च हृदये भेदस्फुरणावस्था
यां चिद्भेदपूर्वको भेद इति यद्यपि क्रमोऽस्ति क्रमानीनाच
क्रियाप्यस्ति तथापि न तावतैव लोकस्तु पश्यति प्रमात्रन्तर
साधारणत्वाकांक्षी बहिरिन्द्रियवेद्यत्वात्स्वरूपान्तरापत्ति
लक्षणं क्रमं यतोऽपेक्षते ततो पूर्णोऽयं क्रम इति अभिमतवि
मर्शात्मिका क्रिया प्रदर्शिनीति तामसत्कल्पीकृत्य ज्ञानतयैव
व्यवहारो न युक्तः उच्यते इति व्यवक्रियते इत्यर्थः नन्वेवं यदि
स्वखादेः साकल्पिकस्य च घटादेरन्तरेव बुद्धिभूमौ करणानि
मेण तदा कथं क्रिया आह अन्तरिति एतदनन्तरमपि चे
तियोऽयं न केवलं बहिरित्यपिः चशब्दः शंकाद्योतकः एवमस
च न च तर्हि क्रमः किमपेक्षया आह अन्तरपि चेति बुद्धिभूमौ हि
स्वामिनश्चेतनस्यायेन चित्तत्वान्तर्वर्तिनः एव बहिष्कारः
ननु तत्र चिन्मात्रे कथं क्रमः इष्टमेवैतदित्याह चिन्मात्रेति
सक्रमत्वं च लौकिक्या इति हि उक्तं ननु तादृशी प्राभवी क्रिया
सब्रह्ममोः कथं न दर्शिता कथमाह न दर्शितेति यावदेव वस्तु
के अन्तर्बहिर्हेतिरिति तावदेवान्तरत्वप्रतिपादनेन सर्वा
भ्यंतरताप्यादिविशेष ... मूर्तिसमसामर्थ्यमेव तत्र क्रियेता

146

ई
प्र वि
४५१
491

ज्ञापयन्नक्रमे शक्तिपदे अस्य चेति सर्गश्चित्तत्त्वरूपस्यात्मनस्त्वर्थः
पैश्वरः शुद्धः सर्गः यत्रोच्यते शुद्धेध्वनि शिवः कर्तेति मायीय
स्त्वशुद्धः यत्रोक्तं भोक्तानन्तोसिते प्रभुरिति सर्वत्र च वस्तुतः शि
वस्यैव कर्तृत्वेपि तदिच्छाकृता दभिमानतोन्यस्य कर्तृत्वमुच्य-
ते यदाह गुरुः उत्तरोत्तरमवग्रहयद्भिः यत्पशुपतोप्यपरस्तु तत्रस्य
यः साधनस्य निजभावनाग्रहो हेतुरत्र भवतो मरीचयः इति
तत्रैश्वरे सर्गेभ्यन्तरचिन्मात्रापेतयान्तर्बहिर्भावस्य सद्भावः मा
यीये तु सर्गेभ्यन्तरे स्वरूपमात्रापेतया बहुशाखोसौ सप
षद्योपि सर्गः परमशिवस्य भगवतः शक्तिविजृम्भा ततः
सा शक्तिरन्तरवभासमात्रस्वभावतया ज्ञानशक्तिरुच्यते
बहिर्भावरूपेण तु क्रमोपबृंहितेन विमर्शदार्ढ्येनोपलक्षि
ता क्रियाशक्तिरिति व्यपदिश्यते यदागमः एवमेतदि
ति ज्ञेयं नान्यथेति सुनिश्चितं ज्ञापयन्ती जगत्यत्र ज्ञान
शक्तिः निगद्यते एवंभूतमिदं वस्तु भवत्विति यदा पुनः
जाता तदैव तत्तद्वत्कुर्वत्यत्र क्रियोच्यत इति भगवत एव प
रमशिवस्याक्रमत्वेपि युक्तो ज्ञानक्रियाशक्तियोगः ननु
मायीये सर्गे काल तत्त्वोन्मेषाद्भवतु क्रमः विद्यातत्त्वान्ते तु
मायानुन्मेषात्कालयोगाभावे कथमसौ क्रमयोग उक्तः अ
त्राहात्र चेति इह हेतुवन्तो मायीयाः प्रमातार उपदेश्यास्त
च कालक्रमभाजः सदाशिवावस्थायामपि चेदन्तोन्मेष-
स्याहन्ताच्छादनीयस्यापि संभवस्तया पर्यन्तस्तैव शपसंभा
विनः अपरदशावेशो हि तत एव अतस्तानपेक्ष्य क्रमो भव
त्वेव सत्त्वमद्रूढ इति किमवान्तरेणानेन हेतुवदिति भूमाद्
वु यथायोगमत्र यत एवं तस्माच्छिवदृष्टौ यदुच्यते

यदान्तस्य चिद्धर्मविभवामोदजृम्भया विचित्ररचनानाका
र्यास्सृष्टिप्रवर्तने भवत्युन्मुखता चित्ता सेच्छायाः प्रथमात्रु
टिरिति परमशिवेपि भगवति उन्मुखरूपायाश्चानन्दशक्तेरि
च्छाशक्त्यपेक्षया प्रथमतत्त्वं एवंभाविवितत्त्रुटिरिति कालांशरू
पत्वं तदुपपद्यते अन्यथा क्रमाभावे कथं पूर्वापरीभावव्यव
हारः किंरूपदेशापेक्षयान्तर्गतमायीयप्रमात्रपेक्षयाथ
युक्तोसाविति नन्वस्त्वेवं क्रमवन्तो मायाप्रमातारः स्रष्टा
नन्तशिवत्वं प्राह प्रमातृसामान्यादिति तत्रापि सुपपा
दिताक्रमस्थितिरित्यपवोक्तं तदेवमिति नैवानकेचिदिति
वास्तवं पतमाह अथवा इति १८२ ॥ नन्वेवंभूते चेच्छिवत
त्त्वं हि तदतिरिक्तं किं तत्त्वान्तरं भवेत् विशेषतः सदाशि
वेश्वरौ कथं तत्त्वान्तरं स्यातां यदागमः लयाधिकारभोगा
धिकृतत्वोक्तिनिदर्शनात् पदार्थः पतिनामासौ प्रथमः प
रिकीर्तित इति अनेन हि पत्युरेवप्ररतोक्ता एकचित्तत्त्ववि
श्रान्तानां च तत्त्वानां देशकालाद्ययोगात्कः क्रमः एतदभ्युप
गच्छन्नेव समर्थ्यते ॥ किंवानन्तरदशोद्रेकात्सादाख्यतत्त्वमा
दितः बहिर्भावपरत्वेतु परतः परमेश्वरं ॥ इतिसूत्रेण। स
त्यं शिवतत्त्वमेवैकं वस्तु सत् विशेषान्तरमपि वास्ति तद्व्या
ते तद्धि स्वशक्तितः स्वात्मनि प्रतिबिम्बकल्पेन वैचित्र्यभासय
न्कालदेशक्रमं भासयेदेव वैचित्र्यस्य क्रियामूर्तिभेदमय
त्वात् अतश्चान्तर्योज्ञानरूपाया दशायास्तदेकावभासनेसार्द
एवं सदाख्याया भवेत्सृष्टिक्रमोपदेशादौ प्रथमदर्शनीयं तत्त्वं
यतः प्रभृति सदिति प्रख्या तदा सदाशिवशब्दवाच्यत्वं इदंता
मेयमि शिवत्वेनेति हि सदाशिवेनोक्तं बहिर्भावस्य क्रियाशा

प्र
भि वि
८५२
492

चिद्रूपस्य परत्वेऽप्येकावभासने भगवतोऽत्यन्तदुर्घटकारिता
परिपोषणैकचित्तात्पर्यमेश्वरशब्दवाच्यमीश्वरतत्त्वं सादाख्य
स्यपश्चान्निरूपणार्हं यतदुक्तं भवति इदन्तस्यभावस्तत्त्वमि
ति वर्गाणां विशेषरूपाणामेकीकरणनिमित्तं सामान्य
मुच्यते यथा पाषाणादावस्थिमांसादीनां पृथिवी सरित्कू
पसरःसमुद्रादीनां जलमिति तदुक्तं श्रीमन्मतङ्गागमेत
त्त्वं यद्वस्तुरूपस्यात्तद्धर्मप्रकटात्मकं तत्त्वं वस्तुपदं व्यक्तं
स्फुटमाम्नायदर्शने यदच्युतं स्वकाद्रूपात्तेनचात्मवशं गतं
ततमेवनतेनस्यात्तत्त्वं तत्त्वसन्ततावितिं तत्रमुद्रुचेत
न्यवर्गस्यमेवमहेश्वराख्यस्य यद्भावचक्रमस्सदाद्यन्तःक
रणावेधभावराशिसंघटरूपमलप्रायमुन्मीलितमात्र
चित्रकल्पंप्रथमस्पष्टोन्मेषदावेचधर्मसौन्दर्यमिव प्रतिबिम्ब
नयाभाति तच्चभावचक्रं तस्यचेतन्यवर्गस्य तथा प्रयत्नेना
मयाश्चिद्धिशेषसामान्यं तत्सदाशिवतत्त्वं मंत्रेश्वरादिरूपस्य
तद्वहिष्करणावेधसंघटशिरूपां चित्रप्रतिमेस्थितत्वमैश्वर
तत्त्वं यदागमः तस्मिन्नेवेश्वरतत्त्वे संस्थितः परमेश्वरः शि
वेच्छानुमताः सर्वजगतः प्रभविष्णु इत्यादि सदाशिवेश्वर
भट्टारकौ तत्त्वया भुवनतत्त्वाधिष्ठायकौ यत्र उपास्यादिब्रह्म
विम्बादिवत् ततएतदनवकाशं ब्रह्मादीनां किं न तत्त्वम
ध्येगणनमिति सूत्रार्थः भूतिर्विहृतिश्चस्पष्टा प्रान्तरदशा
शाहाभ्यां शिवतत्त्वमालिममिनी शिवत्विति हृमोदर्शितं ८५२
नामान्तरेणदमेवतत्त्वद्वयमुक्तं नन्वत्रकिमेतत्स्यादिति
भ्रमितव्यमित्यर्थं सूत्रेणाह ईश्वरो बहिरुन्मेषो निमेषोऽन्तः
सदाशिवः ॥

सामानाधिकरण्यं च सहिष्णाहमिदं धियोरिति ॥ यस्योन्मेषा
दुदयो जगत इत्युन्मेषशब्देन बाह्यतः स्फुटता विधायिया हि
स्य चैतन्य सामर्थ्यमीश्वरतत्त्वं तन्निर्दिष्टं यस्य निमेषात्
प्रलय इत्यत्र तु निमेषशब्देनान्तरूपस्य स्फुटत्वस्यापयन्
सदाशिवतत्त्वं तदेतद्द्वयमचलस्यापि चितः स्वचलनाव
भासनेन किंचिच्चलनात्मकमिति गुह्यस्पन्दोपयुक्तः सर्वा·
णि हि तत्त्वानि भगवतः शक्तिरूपाणि स्पन्द एव यथोक्तम्
गुणादिस्पन्दनिःष्यन्दाः सामान्यस्पन्दसंश्रयात् लब्धा
त्मलाभा इति काचित्तु शक्तिरनन्ताः शक्तीरालिप्य वर्त
मानानेदीयसी भगवतः सूक्ष्मात हृदात्मन मादवीयस्त्वमा
इत्युपासना विचित्रा आगमेषु दर्शिताः एवमुन्मेषनिमेषा
त्मकेश्वरसदाशिवत्वतत्त्वरूपद्वयं स्वीकृतसमस्ततत्त्वैश्व
र्यसद्योक्तं शिवतत्त्वमित्यर्थः श्लोकेनोक्तं परिपूर्णेश्वरताक
स्यन्तु तस्यैव व्यापारो विमर्शलक्षणो हेतुर्हीदं तुद्वयोः समना
धिकरणत्वेन यः सामनीभूता विद्या प्रबुद्धविघातोन्मेवे·
स्यवान्तरस्यार्थः इदं तात्पर्यं ग्रहमित्यनन्योन्यरूपप्रकाश
विमर्शः इदमित्यन्योन्यरूपः एकः शिवभट्टारके द्वितीयो
विधेयेश्वरवर्गे मायाप्रमातरि चैतो ग्राहकग्राह्यलक्षणेऽष्ट
ग्राधिकरणोऽसिद्धो यदान्तमध्यकोटौ समष्टतत्त्वलाव·
द्विधा स्यतस्तदाहमिदमिति ग्राहके ग्राह्यस्य प्रतेपोत एव
प्रपामलग्राह्यांशो विमर्शः सदाशिवनाम्नो इदमहमिति
ग्राह्ये स्फुटीभूतेऽहमिति प्रतेपात्मसामानाधिकरण्यविम
पार्मेश्वरभट्टारके एन सन्नार्थमवतारयति उन्मेषस्यादि
ना शास्त्रकृतामिति स्पन्दादिशास्त्रप्रणेतृणां तस्य चेति

प्र
वि वि
४९३
493

येन शिवस्यैश्वर्यं सदाशिवतत्त्वापक्रमं स्पृश्यते तेनोभयोरपि
प्रसिद्धो व्यापारः विद्याख्यः उभावपि च तद्व्यापारमयौ परमशि
वनाथस्य किंचन नैश्वर्यं ननु विश्वं निमिषितं चेदेकरसैवाहं
तायुक्ता सदाशिवतेति निमेषः कथं सदाशिवरूपता तत
श्च कथं गुरुभिरुन्मेषः कथं निमेषोपि भगवतो व्यतिरेके-
ण निर्दिष्टो यस्योन्मेषनिमेषाभ्यामित्यत्रेति शंकापरास्य
ति नत्विति विश्वं निमिषितमिति हि विश्वस्येदन्तास्पर्शोप
व किंचिद्रूपं वक्तव्यं न च शिवपदे विश्वं किंचित् सर्वथा व
तरालीनेति हि वक्ष्यते आगमे हि स्वभावेनैव शान्तात्माद्यो
वः संसारपवहि सर्वस्मान्निष्यते परस्परेवोरहृदयस्ततः
तिपठितं ततश्च विश्वस्यान्तरिति अहन्तायापरिवर्तमे
नाध्यामलता स एव निमेषः अत एव तदा तद्धि स्वप्रलीनमु
च्यते व्यवहारणीयत्वाभावात् एतदाह सदाशिवदशा
हीति अशेषाणां पुरुषाणां मायाप्रमातृणां बुद्धितत्त्व एव
ननु वर्तिः स्फुरन्तोऽत एवासाधारणतया प्रत्येकं निजनिज
या संविदा वेद्यास्तत एव च साधारण्याभावेनाव्यवहार्यत
याध्यामलत्वेन प्रलीनशब्दवाच्या येऽर्थास्तत्सामानाधिक
रण्येन प्रथा सदाशिवपदं यद्यपि विश्वैतो अहमेतदिति तु
ल्यतयैव प्रदर्शितं तथाप्येतत्तया अस्फुटत्वाभिधानात्
र्वेदशायामहरूत्यत्र भावः ईश्वरपदे तु स्फुटत्वोक्तेरेतदिमन
नन्तैश्वर्यसम्पूर्णत्वादीश्वरता पूर्वत्र तु सदाईश्वरोपलक्षितः
शिवव्यवहारः कृत इति शंकमान एतदीश्वरदशाव्यतिरेक
सापरसदाशिवपदं व्याचष्टे सर्वथेति इदन्ता तावदीश्वर
पदस्फुटत्वेनोक्ता तत एव देदीप्यमाना यदा तु सा प्रधान
नुपलक्षिता ध्यामलत्वेनास्फुटा संपद्यते ॥

तदावेश योगेपि शिवतायाउन्मज्जनात् सर्वेणकलनाय
कारेणशिवतेति सदाशिवतोच्यते साचमायापदव्यवस्थि
तानांभूतानांग्राहकग्राह्यरूपाणांप्रलयः सर्वथैवमायी
यरूपप्रध्वंसात् मायातत्त्वेच तदाभूतानिनिधीयन्ते तच्च
परमेशशक्तिरूपंसदाशिवपदेइदमितिसंशस्पर्शेनविश्रा
म्यतीति निमेषः सदाशिवता एवमेषग्रन्थोनेयः ननुसर्व
नत्विमादिग्रन्थाभिप्रायस्यार्थइत्याशयेनपरमशिवताया
त्वात्मना तथासतिनिमेषतः प्रलयः सदाशिवव्यापारस्
त्वेनेनविशेषापत्तेः ननुयदासमस्तग्राहकग्राह्यमहाप्रल
यस्तदाभवत्वेवं यदातुमायाया अप्रलीनत्वे सतिपार्थि
वप्राकृतादिवेद्यवर्गप्रलयः पुंस्तत्त्वानिग्राहकाणि स्थि
तानियदापुंस्तत्त्वानामेवांतःकरणेषुसंस्काररूपतयास्तः
सुप्तवदवस्थानेविश्वस्यप्रलयोनतद्ग्राहकान्तःप्रवेशस्तदा
कथंनिमेषोन्तरित्युच्यते अत्राह ग्राहकेत्यादि अन्तरि
तिपुंस्तत्त्वेषुनिमेषः संस्कारशेषतेतियावत् नत्वेवमपि
सदाशिवस्त्वयंस्वांशेनेवाचकीकृतः वाचकीकृतश्च
स्याह तदानींचेति तस्यांसंवेद्यावस्थायामपियोमायीय
ग्राहकान्तःकरणपरिवर्तनेनसंस्काररूपोनिमेषः सोपि
ततत इदमित्यस्यविच्छिन्नविमर्शस्येतिन्यायेनाहमिति
पदेविश्राम्यन्नहमिदमिति सदाशिवतामेवस्पृशति
यदासंस्काररूपत्वेस्याहन्तेवतत्त्वंतदाप्रभुत्वएवसदा
शिवता इदन्तयामायीयाहन्तयावासंस्कारतेति ह्यिव
स्याति आख्याहृदयमपिचपुंस्कमित्याह अतएवेति यतः
प्रलयोहिद्विधा पुंस्त्वावशेषतायां तत्संस्काररूपता

ई
प्र भि
४९४
494

भाजांवेद्यानामर्थानांमज्ञावेमवेद्यतयापुंस्त्वानामपित
मायाशक्तौप्रलीनत्वेनसदाशिवपदान्तर्गमनेपृथक्त्वमात्
त्वाभावात्तदपेतयावेद्यानांप्रतिष्ठानादपवेद्यतयानतस्या
दशास्यसत्त्वमस्याप्युभयरूपत्वंवक्ष्यते तावन्मात्रस्थितौशो
कोसौशुभंप्रलयोपममित्यत्र एवंयस्यनिमेषात्प्रलयइति
व्याख्याय यस्योन्मेषादुदयइतिव्याचष्टाणः सदाशिवप
दादीश्वरपदस्यव्यतिरेकमाह ईश्वरदशेति दशाशब्दो
वस्थाशब्दस्यार्थे मायायांस्फुटेदन्ताभाजोर्थाईश्वरपदे
स्पष्टाभवन्ति नत्वेवपरमार्थेनेदन्तावस्यस्फुटतापत्तेः
यस्योन्मेषनिमेषाभ्यामित्यत्रजगद्ग्रहणेनवेद्यवर्गएवक
स्मात्संगृहीतः यावतासदाशिवपर्यन्तेपिप्रलयः सर्ग
श्चागमेश्रूयते यत्सदाशिवपर्यन्तंपार्थिवाद्यंचसुव्रते
तत्सर्वंप्राकृतंज्ञेयंविनाशोत्पत्तिसंयुतमिति ततश्चत
योरप्युन्मेषनिमेषस्वीकृताभ्यामुदयप्रलयाभ्यांव्यपदेशः
कर्तव्यः किंच यथाशिवस्योन्मेषनिमेषव्यापारोतत्त्वान्त
रेसदाशिवेश्वरावुक्तौ तथानयोरप्युन्मेषनिमेषव्यापा
रौकस्मान्नोक्तौतत्त्वान्तरतया तदेतदाशंकाद्वयमेकेनवा
क्येननिराकरोति सदाशिवेत्यादिना इदन्ताभागस्यैवाप
ररूपस्यतत्रागमेप्रलयोदयौपरमार्थेनउक्तौमन्तव्यौ
तदभिप्रायेणैववचनंच मायाकालंपरार्धानांगणयित्वा
मानेनतुईशोदिनंरात्रिरेवमित्यादिक्रमेणशाक्तितत्त्वांते
पिश्रीस्वच्छन्दादिग्रन्थेनगणयित्वैश्वरंकालंपरार्धानांशते
ततसादाशिवंदिनंरात्रिर्महाप्रलयइत्यादिनाकालयोगाव
पदिष्टः तत्त्वीश्वरशक्तिरूपयोरनयोः प्रलयोदययोर्युक्तौ तथा
तयोरपियत्प्रलयोदयव्यापारवत्त्वं।

तत्परमार्थमः परमशिवस्यैव इति पृथक्तयोः तव्यापारा
न्तरमुक्तं तावतः पूर्णशिवरूपत्वात् एतदेवाह एकमेव
हीति येष्विति येषु भावेषु मध्ये तदानीं चेति अवभासना
कालेन केवलं ग्राह्याणामित्यपि: शून्यतारूपाणामिति
अपवेद्ये प्रलये संस्काररूपतया स्वरूपमात्रावशेषवेद्यता ग्राह्याणामप्य
पुर्यष्टकरूपाणां सवेद्ये ग्रहकायत्तत्वाच्च
सोप्रलये इति न सभेदेनाभिहितः एवं च सदाशिवेशौ
शिवतत्त्वान्न भिद्येते ततः कथं तयोः सृष्टिप्रलययोर्व्यापा
रान्तरं व्यपदिश्यते इत्येतत्कृते निर्वाहयितुं नैतत्त्व
यासमाप्तमित्युक्त्वा प्रायेण प्रमेयान्तरं निरूपयति त
देनाह इत्यादिना प्रत्युपस्थापयन्तीत्यन्तेन त्रिंशादिति
भूततन्मात्रबुद्धिकर्मेन्द्रियविंशकं मनोहंबुद्धिप्रकृति
पुरुषरागनियतिविद्याकलाकालाख्यानि प्रविशन्ती
तिधाता इच्छेति शक्तितत्त्वसंग्रहः सप्तदशेन तत्त्वा
नां तत्सर्वं पूर्वानुप्राणितत्त्वमाह ज्ञानक्रिये सदाशिवे
श्वरौ तद्व्यापारेपि विद्यातत्त्वेनैवानुप्रविष्टं मायातत्त्वं
देहेनोपादानकारणमात्रत्वेन पृथक्त्वेन समतं अपि
तु परमेश्वरशक्तितया तथा हि मृदादिः पदार्थः प
रमेश्वरशक्तिरूप एव संस्तदिच्छावशाद्घटकारणतया
पि नियतो निर्भासमानः पृथक्कारणमुच्यते अतए
व सर्वभावानां शिवः स्वभावः तेन विना निःस्वभा
वत्वात्सर्वस्येत्याशयेन स्पन्दशास्त्रे तमविष्टात् स्वभावस्यैव शिवा
भावेन स्वभावमिति कथितं तथापि सूक्ष्मे चैव तत्त्वानांया
त्मकत्वादि श्रीत्रिशिरोमतेति

यस्त्वहमेतावशिवइति सर्वं शिवशास्त्रमात्मोक्तं तद्वन्मायापी
ति पंचैतानितत्त्वानि ततोपीति तेभ्योपि तत्त्वेभ्यो हेतुभूते
भ्यः शिवतत्त्वस्य षड्विंशतत्त्वस्य न भेद इति संबंधः अभेदादि
तिमतिविश्वे हि भेदो सन्नपि आभाति तावत् शाक्तेन तदपि
नेत्याशयः आदिपदेन नियति रागौ तामामिति कालादि
शक्तीनां विवतादशायामिति यथा घटादेः पृथग्भूतावभा
स उदकाहरणसामर्थ्यं सकरपित्वया पृथग्भावावभासेव
न हि तन्मकुरस्य शक्तिरिति अवभासः परमार्थतस्तु यथावेतिय
तिविश्वमेव ग्राह्यमुच्यते तथा मकुरेपि सत्त्वेपि पतत्त्वेति काला
दयो ग्राहकत्वे उपयुज्यंते अहनान किंचित्करोमि जानन्न
भिषक्तोहमिति हि कालकलाविद्यारागान्तविद्धपवार्थ्य
नियत्यन्तशाक्तितो ग्राहक उच्यते अन्यैरिति शैवव्याख्या
तृभिः तथा हि शिवब्रह्मतत्त्वग्रन्थे गुरुपादैर्निरूपितं पं
चविंशतत्त्वेषु शिवनाथस्यैव शक्तिरूक्तेयं तत्र च तस्तस्तु परा
अन्त्यैवे पंचविंशकस्थूलाः मध्यास्तु सूक्ष्मरूपाः शक्तयश्च
साम्भ्रनास्तु परमित्यादि ग्राह्यायत्तत्वाद्ग्राहकतायाः यद्यः
पि कालादिशक्तयोपि ग्राह्यं स्पृशंति तथापि सामान्य
तएव न विशेषतः बुद्धिकर्मेंद्रियशक्तयस्त्वियत्तया कार्य
तया च विशेषत एव ग्राह्यं स्पृशंति इति ग्राह्यादिपदस्याश
यः तास्वपीति स्थूलसूक्ष्मतयोभय्याः मायाप्रमातुरपिप
रमार्थतश्चिदेवतत्त्वं इति शिवस्यैवैताः शक्तयः तथाहि य
तः करणवर्गोयमिति नीत्या वस्तुतस्तु स एव सर्वं जानाति
करोति चेत्तदाह ग्राहकात्मत्वपीति निराभास इति
वेदकैकरूपे सत्युपसदृपाइति ॥

अहं घटं जानामि करोमीति हि श्रोत्रवाक्यस्तत्त्वं अत एवाह
विमर्शजातीय इति अहमिति विमर्शस्य विशेषरूपा एताः
विमर्शाश्च भगवत एव शक्तिरित्युक्तं विमर्श एव देवस्य
ति तदेतदुक्तं गुणादिस्पन्दनिःष्यन्दाः सामान्यस्पन्दसंश्र
यात् लब्धात्मलाभा इति येपि प्रतिबिम्बरूपा ग्राहकास्ते
षां चिद्भागाः शिवश्चैवस्वरूपा या चिद्भागोपि वेद्यात्मा तच्छ
क्तिरेव सदाशिवरूपेणोपपादयति ग्राहकाश्चापि इति प
तत्पूर्वमेवास्माभिर्विमृष्टं चितिशक्तिर्विश्वरूपा भवति
न चाधिकं स्पृशतीति सम्बन्धः चेतनातिरिक्तघटकारित्वादि
नाहन्तां व्यनक्ति एतत्संक्षिप्य घटयति योहीति इदन्ता
भागिति निरूढेदन्ताकोर्थावभास इति सम्बन्धः एतत्प्र
मेयं प्रकृते उपयोजयति एवमिति ईश्वरादिव्यवच्छिद्य
ते शिवत्वाद्वैतेनेति संबंधः आदिपदेन सदाशिवादि नवै
तावन्ति तत्त्वानि शिवप्रलीनानीति नास्माभिः स्फुटं प्रो
च्यत इति दर्शयति वक्ष्यमाणेति प्रमाणभूमौ सदाशि
वपद एव स्थितिः वस्तुभूमौ तु प्रलय इत्याशयेन सर्गस्थि
ती सर्गस्थितीसर्गप्रलयाविति च दर्शितं ननु सदाशि
वतापूर्वं स्फुटावस्थास्ति कथं प्रलयतैवास्याः अत आह अपे
चेति अस्फुटतैव हि प्रलीनत्वमुक्तं स्फुटेन प्रलयपदेन
व्यपदेशे हेतुमाह प्रलयस्येति व्यक्तिः स्फुटत्वप्रपंचाद्युप
पादविरहितः प्रलयशब्दो भूतपूर्वस्फुटदशादर्शनं यदस्फु
टत्वं विनाशशब्देन प्रसिद्धं तद्वत् इति लोके निरूढिः एवं
श्लोकार्थं व्याख्यायावान्तरं विवृणोति तस्य चेति सदाशि
वेश्वरोभयरूपस्य यः स्वरूपादभेदपरामर्शस्तद्विधानाम

ई
प्र वि
४९४
496

मतं अत्रैव सच्छद्मार्थनिरूपणाशयेन हेतुमाह स्वात्मोल्ला
सेनेत्यादिना तस्येति विमर्शस्य ननु यथाहं भेदरूप एव स्वकारण
परम्पराधीनजन्मास्तु इत्याशंक्यान्यत्रापि सर्वोक्तहेतुत्वेन स्फा
रयति प्रकाशादिति अत्रेति सूत्रे अनेन घटादीनां ग्राहका
न्तरत्वमन्तःकरणभुवि रूढत्वेन नाहंरोहीत्याह नन्वीश्वर
दशायां स एव प्रमाता शून्यपुर्यष्टकादीनां तस्यैकरस्यैव वे
द्यता ततश्च कोऽन्यो वेदकस्तत्र स्यात् येन वेद्येन साकमेकत्र
चिन्मात्रात्मन्यधिकरणे विश्राम्येदिति इति चोद्यांशंकाया
माह वेदकश्चेति वत्यते इति तेतु भिन्नावभासार्थो इत्यादिहे
शेषु ननु यथा नीलगुणात्मलगतो ऽहं आत्मन्यधिकर
णे विश्रान्तिस्तत्तीये तथाहन्तेदन्तयोरपि सा वाच्या नच
तृतीयमस्ति चिदचिद्द्वित्वमेवेति यत्नेनोपोद्घातेन समर्थि
तत्वादित्याशंक्याह संचेति वेदकश्चिद्रूपमेव पूर्णतया
संकोचनप्रकारेण स्थानान्तरसंक्रान्तमिव तत्तीयमधिक
रणमिति यावत् मतिशब्देनेति सूत्रे अनेन मनोव्यापारो
मतिः सा कथमिन्द्रियवर्गनिरपेक्षसंवेदने भगवतीश्वरे
भवेदिति शंकोत्क्रान्तेति तत इति चित्स्वरूपादीश्वरात् य
थैवेति उपदेशभावनाद्यपेक्षेण स्पष्टेन कल्पनायातेन विभा
गेनेत्यर्थः ननु शक्तितत्त्व एव तर्हि विद्यान्तः भवेदिति कथं व्या
पकत्वं तत् अत्राप्याह येनैवेति शुद्धशब्देनेति सूत्रेऽयं च
परमेश्वरेण विनावरूमित्यस्यामिदमिति समस्तस्वीकारः
णीमतेन । निग्रहानन्तरं निरूपितास्त्वद्विद्या तथाहि
ततप्रग्रन्थ्यो मायान्तर्वर्तिनाः प्रोक्ताः पशवः पाशधर्मिण
मायातीता परा विद्या विग्रहाधप्रदर्शिका साकथं युज्यते ॥
नोक्किहि.

सदेहज्ञेतमः उत्तरग्रन्थस्तु शिवाद्यवनिपर्यन्तो योयमध्वाति
विस्तृतः ससमस्तोश्चितोत्तेयोनाशिवत्वाहिमुच्यतेइति अय
मितिहीदन्तोक्ता चिन्ताचित्यहन्ता १४४ अस्याविद्यायाः क
र्यं शुद्धेत्याशंकायांसूत्रं इदंभावेत्यादि अवलोकनेवेद
नेविद्यासाचेयंवस्त्वनुसारिणीतिशुद्धा तथाहिवेद्यदशाम
गीकृत्यवतामप्यनपवोचितेनेदन्तापरामर्शेनपरामृशतां
वोधएवप्रकाशात्मासारंवस्तु प्रकाशश्चानन्यानुखादं
विमर्शमयः तथैवचप्रकृष्टत्वेनेदन्तायाअहमिदमितिभव
तीति शुद्धमिदंवेदनमिति सूत्रार्थः एवमवतारयति अ
शुद्धेत्यादिना शुद्धाशुद्धयोविद्ययोः एतान्तरपरीतत्वाद
न्योन्यव्यतिरेकेणस्वरूपमुपलक्ष्यंभवतीतिमनसिकृत्याशु
द्धविद्यांतावद्दर्शयति मायेत्यादिनावसरे इयत्तेनवाक्ये
न अशुद्धविद्याया उपयोगंदर्शयितुंपशोः स्वरूपमाह
प्रथित इयत्तेन स्वात्मैवास्यपरंप्रकाशतेनपरंकिंचिदस्य
र्थः मायीयानांकालभेदसंगतिर्नेवपरमेश्वरशक्तिरूपा
यामायायास्त्वतोमायामूलोपिमलोनादिरेवेतिनित्यएव
पशुः यच्छ्रीकिरणोक्तिः पशुःनित्योह्यमूर्तोज्ञोनिष्क्रियो
निर्गुणोप्रभुरिति तत्रएवसर्वतः संकोचादणुः सोणुर्यद
स्माद्भिन्नवेद्यवेदकस्तन्मायीयइतिसम्बन्धः मायीयत्वेवदामी
त्ति शुद्धविद्यातोव्यतिरेकोदर्शितः नन्वित्यादिनातदभेदेनेति
विद्याभेदेनपरमिति ततोन्यदमायीयं १४५ अधिष्ठानादेव
नाव्यतिरिक्तमेवतत्स्वनामकमेतत्त्वद्वयमिति भण्यप्रति
पादयितुंसूत्रं अत्रापरत्वमिति अपरत्वमपूर्णतान्याकांक्षि
त्वमिदमिति परत्वंपूर्णमहमिति अतएवचतत्त्वद्वयेपिता

वंशोऽस्त्विति वेद्यभावनिष्ठा दशा न त्वस्वरूपा तदवभास
यितृस्पृष्टमात्रवेद्यवस्तुसाधना तदेवनिष्ठसंवेदनदशा तत्र
द्विविधा तन्मात्ररूपमेव महेश्वरादिवर्गाधिष्ठातृत्वं श्री
सदाशिवेश्वरभट्टारकरूपतेति तात्पर्येण सूत्रार्थः तं संग्र
ह्णाह आगमेष्वित्यादिना तत्त्वगतशब्देनादेवतारूपा ह्यति
रेकः सूचितः ईश्वरावस्थायां स्फुटीकृततत्त्वादिदन्तायास्तु
लाभूतं परत्वमपरत्वं चेत्याशयेनाह ईश्वरावस्थेति पतं
ह्वारेण च सदाशिवदशापि न स्वीकृताभेवेदित्यभिप्रायः
नात्र सांख्य इव परिणामक्रमेण दशाव्यवहार इति दर्श
यति आत्मीयस्वातन्त्र्येति परापरत्वेऽप्युद्रेकोद्रेशस्यानाभि
त्याकारं परत्वेनावतिरूपयितुमाह तत्रेति तद्विपरीतमि
त्यादिना सूक्ष्ममपरत्वमाह तावदिति द्वितीयविपर्यासात्तु
दयेऽपि इयतैवापरत्वमुल्लसितं विद्येशानामिव तदुदयेऽत्र
तदेव ब्रह्मादिकीटान्तानामिव स्फुटतामेष्यतीत्याशयः
तत्रापीति द्वितीयप्रकाशने स्थिते तितदाधिक्यमित्यर्थः
पूर्णतायाग पस्यति इदमिति परामर्शपतयैव हि पूर्णता
निरवकाशीकृतानात्तइवाभागपवशाद्धा सदशामधिश
यानस्य अहमिति परामर्शतायां भवितव्यं पूर्णतयेति
किञ्चितयोर्नियोगाइव अनेनेति अपरत्वमित्यनेन पूर्तिश
म्येन पुंस्त्वग्रहणेन ब्रह्मादेः संग्रहेऽपि मायीयेश्वर्यांशोद्रेका
श्रयादानं पतेनेति परतेत्यनेन नहृनिवोकान्तस्पृहेहेदशानि-
त्रप्रभिश्रीकारेण तृतीयामाह ॥

हृन्नाविति अतो हेतोर्भयांशवशाद्देषाद्दशापरापरावस्थेति
शाकल्यवादिनेति न तु जाड्याख्यायामायातेन अपितु व्य-
क्तिभूमानमभिदधता पूर्णत्वं पूरितमिति सम्बन्धः विशेष
रदशान्तर्हि काभावेदिति निरूपयितुं व्यतिरेकप्रसंगात्स्वन
परावस्थाः स्पृशति द्वितीयार्थेत्यादिना अमुनेति अपरत्वं
भवति न तु संसारिजनतुल्यमितियावत् तेनवैयाधेः संसा
रितुल्यापद्यते इतिनिरूप्य वेदकांशामुखेनोत्कर्षं दर्शयति
पतान्तरेणाविरूपाचलनाहेति १५९ एवमहमिदमिति सं
वेदनेयदाच्छादकेमहमिति रूपं तस्यायाथात्म्येनव्यापारः शुद्ध
विद्येति प्रतिपादितं इदमिति तु यत्रात्माच्छादनीयोत्रभाग
स्तस्यायाथात्म्येति तु मनागन्तर्दर्शयितुं सूत्रं भेदधीरेवेति शून्या
दिरूपमायाप्रमातृत्वासेपि संविन्मात्रे एववाह्यरिक्ततेवि
चनभावेषु तन्मयेष्वपि भेदप्रकाशनलक्षणा यत्स्वातंत्र्यमा
याशक्तिरूपमिव तत्प्रमातृभागे विपर्ययाभावाच्छुद्धविद्या
येन प्रकारेणानन्तभट्टारकाद्या विद्येश्वरा वर्तन्ते तेहि शुद्ध
न्माय वद्वाह्यभावा एव भिन्नभाववर्गं पश्यन्ति हैन हेषी वेश्व
रः तेन परमेश्वरस्वातंत्र्योपजीविनी विद्येश्वरशक्तिः शुद्ध
विद्येति तात्पर्यं सूत्रस्य तदाह विद्येश्वराणामित्यादिना अ
पचेति निकृष्टा इदम्भावस्य प्ररूढत्वान्निकर्षः तामेवाह
विद्येति ग्राह्येनेति संगतिः अतएवेति स्फुटपशुभावाप्राप्त्या
भावात् कर्मणामिति लौकिकवैदिकात्मनां दीताध्यानादे
नादेरेव तु तद्द्वेषेन कृतानन्याप्तिः अप्रकृतप्रायश्चित्तस्मरण
दीताधिकारोपि प्रकृताधिकारः योगपविधिलाभेपितस्पर
मेति यदागमः अधिकारं न चेत्तयोर्हि विशेषः स्यात्तत्तयेऽति

६
प्र भि
४९८
498

एवमागमोऽप्यवशमभ्युपेत्य इत्याह ईश्वरेत्यादि सार्थकमि
ति विद्यातत्त्वे स्थिता ईश्वराः सर्वज्ञाः सर्वकर्तारश्चेति विद्येश्व
राः ननु एवमपि कस्मादेषां न तत्त्वान्तरताप्रसंग इत्याश
ङ्काह तत्त्वानां चेति मायायामिति पार्थिवे ब्रह्मा प्राकृते वि
ष्णुः मायीये पदे रुद्रः इयं च मायाशक्तिविजृम्भितमिति सा
मान्येन मायायामित्युक्तं हि निर्व्याचष्टे मन्त्रविद्यानामिति ए
वं च ज्ञानादिपरामर्शसारशाक्तराशिकलाशरीरत्वेन प्रवा
न्तरभेदस्तु शक्तिसिद्धेः संवेदनवाच्यस्वरूपयोः शक्तिमच्छ
क्तिरूपयोश्च क्रमेण प्राधान्यात् तथा श्रीमतङ्गादौ विद्ये
श्वरेभ्यः पृथगेव विद्याराज्ञात्मिका या निरूपिताः ६७ स्वा
त्मात्मिका तावदिच्छैव भगवतः शक्तिः सा तु क्रमभेदेन
बहुधोपचर्यते तत्र यथा मन्त्रेष्वस्फुटास्फुटेदन्ताप्रकाशने
सदाशिवेश्वरता ज्ञानक्रियाशक्तिरूपा चिन्मात्रग्राहकत्वेपी
दन्ताप्ररूढौ क्रियाशक्तिशेषरूपैव महामायाविद्येशशा·
क्तिः ग्राह्यग्राहकविपर्यासे पशुप्रमातृषु मायाशक्तिः तथा
ग्राहकग्राह्योभयविपर्याससंस्कारशेषत्वेपि योगिज्ञानि वि
षयं यद्वस्तु परमार्थमयं नेतत्र यद्भगवतः स्वातन्त्र्यं माया·
शक्तिविपरीतं तद्वशं पतत्त्वान्तरं यद्धि वीक्ष्यते पृथक्क·
योजन इति तदेव विद्यातत्त्वमिति मायाव्यतिरेकेण त
द्रूपं दर्शयति सूत्रेण तस्यैश्वर्यस्वभावस्येति पशुभावे ग्रा
हकग्राह्यविपर्यासोभयात्मनि पाशयोगलक्षणे स्थितेपि
तस्य प्रमातृपरमार्थरूपस्य ऐश्वर्यलक्षणस्य स्वभावस्य याप्र
काशिका भगवतः शक्तिः सा निष्कलप्रमातृषु वर्तमाना वि
द्या यद्दृश्यते विद्याभिज्ञापितैश्वर्य इति मायाशक्तेर्नाव्यापारः

स्याद्धि तिरोधानस्वरूपावरणं हेतुनाच्छीत्यादिना करोति यद्
विष्यति एषप्रमातामायाख्यः संसारीति तेनस्वरूपप्रकाशः
नशक्नोतीति विवेकेवसेति सूत्रार्थः तमवतारयति मायेत्यादिना
तेषांतेषां घोरात्मनामायातेव्यतिरेकं व्याख्यातं एतत्तिरोधानका
रीत्यादिसौत्रे तदाह वृणोति ऐश्वर्यस्वभावेत्यादिना तिरोधान
क्रारीत्यादिसौ वरणं स्वरूपाप्रकाशनं मलमज्ञानं प्रसज्यप्रति
षेधात्मकं यत्तदेकं तत्स्वरूपवत्तु तदुपप्राणितपर्युदासात्म
नाविपरीतप्रकाररूपं द्वितीयं तदाह भ्रान्त्यादीति तथाप्रसिद्ध
मिति रूढिमात्रान्मायाशक्तिकृतत्वेन सर्वस्यापि एतद्रूप
मेव प्रथात्मनलाख्येति श्रीभैरवसूत्रे प्राख्यग्रहणं स्फुटि
स्थितीति प्रलयविपरीतताजागरस्वप्नेति स्वप्नविपरीततो
क्रा प्रलयस्वप्नयोः सर्वासर्वसाधारणेतरयोग्रविरता
दिनाभेदो मन्तव्यः एवं त्रीणि सृष्ट्यादीनि कृत्यानि तिरोधान
रूपाणि प्रतिपाद्य चतुर्थमपि विलयनामकं तिरोधानशब्दे
नप्रसिद्धे तिरोधाने मायाकार्यमाह नरकेत्यादिना ननुबल
दृत्यादितो नरकगमनमिति सृष्ट्यादित्रयमेवैतत् मैवमित्या
ह कर्मफलानि तिक्रामिति यत्किल परमेश्वरेसमयमङ्गीकृत
वतोप्यन्तस्तद्विषये हेयकालपातनकर्मानपेतयैव मुक्तया
परमेश्वरेच्छयैव प्रकोपापरपर्यायतया भवति तेनमुक्त एवङ्ः
रेवनियतिवदनावलोकिशुभाशुभवलवतस्तथर्मा
निमित्तेयेतशुभाशुभानुसरणमनन्तरेणैवतेपरमेश्वरेच्छा
तएवकेवलायाः नत्वतत्कृतानडुः एवावाप्तिविलयस्तिरो
धानंचोच्यते नत्वतात्कालिकमात्रंवा कालान्तरान्तंवापि
वा पूर्वकामान्यकतिपुरावरणादीनां उत्तरंतुशिवत्व

६
प्र वि
७५५
479

रुद्राणस्वसमयादिद्वेषिणांनरकपातमयं अतएवेति यतः
क्रमान्तरमुक्तंततः ननुपंचमेनतत्किं आह अनुग्रहस्थेति सोपि
क्रमिकोवरदानात्मानन्दीश्वरादिषु अक्रमिकस्तु दीक्षाभ्याः
स्यादिकंगित्यपवर्गदः सर्वमित्युक्तेनुग्रहस्यापिमायाकार्य
तोक्ता तत्किंव्यापारान्तरेणाग्रेतिशंकांध्वंसयति वरदानादिर
पीति आदिग्रहणेनसिद्धिप्रेप्सयाधनादिकाम्ययार्तिविवा
रविषयापिच यत्परमेश्वरसमयप्रतिपादनेनतदप्यनुग्रहरूप
मेवेत्याह उन्मेषशाठ्येनातीव्रत्वेनत्र विद्याया आवतारणास्ती
व्रविद्याकृतानुग्रहवैलक्षण्येन रुद्रशक्त्याविष्टोमात्सर्येर्ष्यारेवगु
रूपमदनादिकंदीक्षाज्ञानयोगचर्यादिकमेतद्देहपातएवाप
वर्गफलंप्राप्नोतीति दर्शयति स्यादितिपदेनेदमेवाप्यसू
चितं यद्यपि वरदानादौमायाया अविनिवृत्तिस्तदाशये
नचसर्वमित्युक्तं तथापिसंभाव्यतएवाग्रविद्याशक्तिकृतो
लेशेनावेशोयः परिपाकेमोक्षफलः अतएवगीते चतुर्वि
धाभजन्तेमामित्युक्त्वा उदाराः सर्वएवैतेइतितीव्रविद्याश
क्त्यनुग्रहस्तुदर्शितः ज्ञानीत्वात्मैवेति अतश्चप्रपंचितंप्रथ
मतएवतथानवथानुग्रहणेनेश्वरः शक्तिपातइतिसविवे
चितंश्रीतंत्रालोकादौ १४६ वितत्यस्वरूपंस्फुटयितुंमाया
तोव्यतिरेचनंयदुक्तंतदाशयेन यन्मायायाः स्वरूपमु
तिरोधानकरीति तदेवसदृष्टान्तेरणस्पष्टीक्रियते भेदेत्व
करस इति अतएवावतावरणापाविपर्ययहृदयहेतुरिति
नद्धेतुत्वेनस्फुटेनरूपेणोत्पर्यः सत्यमेयमलयैवतिनत्व
भावसमाधोचयद्धामकल्पमनल्पमिवाभाति ॥

नटनुस्मर्यमाणत्वेन वेद्यं सदहमित्यात्मत्वेन स्वान्तेप्येणाभि
निविशते उच्छ्वसिमि निःश्वसिमीत्यत्र प्राणो वायुकल्पः
वुभुते पिपासामीति प्रत्ययेमनुप्रज्वलनादौ च स एव तेजः समु
पहितः अन्तरहं वेद्मि सुखी दुःखी मूढोहमित्याद्यवस्थासु
लच्छसलिलाशयसदृशो बुद्धिः कृशः स्थूलो गौरोहमित्या
दौ शरीरमेव स्थूलीभावं अत्र च चिन्मात्रता परमार्थेपि यदे
यताभासनमेतदाद्यं विपर्यासं मायीयं अतिरस्कृतवेद्यभाव
मेव तत्तज्जडमपि सद्यदहमिति आत्मतया भाति तद्द्वितीयं एवं
विधातिदुष्करविमोहनव्यापारंपम प्रतिघातरूपेयमिति
कथयितुं विजृम्भते इति वायरूपेणाविवेकावगम्यतायामपि
बुद्धिप्राणशून्यप्रमातृभावस्य रूपत्वेनाविशेष इति वदता
दारसुतधनभवनादावपि गाढामहन्तां स्फुरयतीति सूत्रा
र्थः सामानाधिकरण्ये चेति या विद्या दर्शिता तामनुवदते
मायाशक्तिं नतो व्यतिरेचयितुं ईश्वरस्येत्यादिना शरीरस्य
पौर्यमाणतां दर्शयति जरेत्यादिना अभिन्नरूपमिति तदः
व्यभिचारिणामिति यावत् प्राणानुपववर्गपंचकस्यावितथ
स्यचानुप्रवेशात्तुर्येष्टकरूपतामिच्छति स्मर्यमाणत्वादिति
तं विद्रूपं हि अविच्छिन्नस्वप्रकाशभावः कथं स्मर्यते तदुः
क्तं नाभाव इत्याद्युपक्रम्य यतोभियोगसंस्पर्शात्तदासीदि
तिनिश्चय इत्युक्ता नन्वेवं स्मर्यमाणत्वे तत्त्वं प्रतिपद्यते
इतियदावा एवं तदा अनात्मैवाहन्तया प्रतिपन्न इत्येवम्
सर्वोयं द्वितीयो विपर्यास इति महावाक्यस्य संगतिः तथैवेति
आत्मतया एष एव च द्वितीयो विपर्यासो नात्मन्यात्मभावना
ख्यः सांख्यादिशास्त्रे सर्वत्र रूपत्वेन सिद्धः नतु एवं तैनैव च

६
प्र वि
५००
६०७

प्रथमेनविपर्ययेणान्तःक्रोडीकृतप्रवाहं द्वितीयोविप-
र्यासः यदुपसंहरिष्यति तदेकप्रवाहमिति ननु समशी
र्षिकया द्वाविमौ विपर्ययाविति निर्णेयत्वमलत्वमस्योपपा
दयति प्रदर्शनं चेत्यादिना नन्वदर्शनयोग्यं पुर्यष्टकादि
प्रकाशमानतयानामसंभाव्यतां घटादिवदेव तस्य तु किम
हंप्रतीत्याधिकयायेनोक्तं प्रतीताविति आह तस्यैवेति के
वलमिति इयदधिकमवश्यमंगीकार्यं अहंप्रतीत्यभावे हि
सएवमुद्ग्राहत्वसहितइत्यात्मतयायोनहंरूपते भाववर्गो नी
लादिस्सनैव प्रकाशते प्रकाशते चासौ नीलमिदमिति हि
न मूर्च्छितत्वमस्य पदसदः तदवश्यमहंभावेनाधिकेनात्रभवि
तव्यं येनकेवलंकृत्वामूर्च्छितत्वाज्जडता न भवति नन्वस्ति त
त्राहंभावपेक्ष्याप्याच्छादकस्तत्किमपरेणापृथग्भूतेन ते
नेतिचोद्यं परिहरति पुर्यष्टकाद्यपीति तेनाहंभावेनात्तता
सर्वथैव तिरोधीयत इति पुनरपि नीलमिदमिति न प्ररोहे
त. ततस्तादृगपरोहंभावोत्र निषेद्धव्यः यस्तु वस्तुतो निर्म
लनयातिरस्कर्तुंनशक्त इत्याशयशेषः प्रथममित्याद्यः प्र
थानभूतस्वयत्नेच्छावविवेकः वेद्यीकरणमध्यानां मलो मा
याख्यउच्यते मलमिति मलत्वेनैव तच्च निदानापेक्षया मा
याख्यतया प्रसिद्धिरागमेषु भगवतास्यापिना द्वितीयस्य
तमलस्य विषयप्रयोजनापेक्षमाणव इति ततास्यप्रथम-
स्यमुख्यं विषयमाह आणवोपचारनास्ति तत्र यथेत्यादिना
सर्वविज्ञानादेवाणवाभावः वाचक इति परामर्शसारेण न
तु केवलश्रवणविषयरूपः शब्दविशेषो मायीयवर्णानु
प्राणनकृदमायीयः ॥

यथोक्तं तैस्तैरालिंगिताः सन्त इत्यादि सप्तात्माहंभावभा
जनं येषां ते तेन शब्दशरीरत्वात्संकुचिता वेद्यवर्गादन्योन्य
तच्च शब्दस्य चात्यन्तप्रकाशप्रतिनिविडावरणरूपत्वाभावा
न्न सर्वज्ञताहानिः एतच्च विशेषग्रहणेन प्रमातृत्वादिविशे
षणोपादानेन चासूचितं एतदेव समर्थयितुमनन्तरो ग्रन्थः
प्रचचवदोषमित्यप्यवसेत्येतत्सूत्रविवृतिप्रमेयमनुमन्तव्य
प्रयोन्यभिन्नं मन्त्राणां वर्गसामान्यात्मना तावत्साधारणेन
रूपेण ग्रस्तांगवक्त्रेष्विव मूलमन्त्रांशरूपतयानुयतः सामा
न्यविशेषणोत्वासत्वादित्याद्येन भिन्नाः स्वयं तु वाचकशब्द
शरीरा एव तदाह उभये चेति मंत्रमन्त्रेशाश्च मंत्रेश्वरा अ
पि वाचकशब्दशरीरमन्त्रेश्वररूपमन्त्रविशेषाधिष्ठातारो
मन्त्रेश्वरतयैवात्र संगृहीताः यदुक्तं वीथानामपि कर्त
न्नुषामित्युपक्रम्य विघेश्वराश्चत इति तदपेतयेति वाच
कशब्दविशेषात्मकशरीरोपाधिसम्बन्धप्रतिलब्धसंको
चवशेनेत्यर्थः एवमस्य व्यतिरेकेण स्वलक्षणताप्रमेयस्य
भवति इत्याशयेन मायाप्रमातृत्वविद्याप्रमातृस्थसान्तरवि
चारेणाव्यतिरेचयति मायाप्रमातारश्चेत्यादिना मंत्राणां हो
त्यादिना च इदन्तेव बहिःशरीरबुद्धिप्राणादिषु प्रधानभूतान
दोते शब्दनरूपवत्संवेदनगामिन इति संविदं संकोचयन्तोऽ
विडतममाहृएवते नन्वेवं शब्दनशरीरे मन्त्रात्माहृदयाका
शोविमर्शरूपतया परिवर्तमानोत एवानाहतशब्दवाच्योऽ
त्यादितो मन्त्रः दौरात्म्यं स्पर्शयति स्पर्शादेरिति एतदल्पमु
क्तं इयं तूचितोक्तिरिति वाग्रहणं अत एव गगनादिपदरू
भूतान्तरवर्तिन इति खटखटाच्छलाम्बुलादिरूपस्यमेये

प्र
भि वि
५०१
501

कर्तृरूपस्येत्यर्थः तत्रापि यस्तस्य परामर्शकस्तदव्यक्तप्रमेय
भूतस्खलत्तरणात्मकशब्दानुकरणत्वेन वैयाकरणैर्गीतः
स आकाशीयो वाचक एव प्रमातृविश्रान्तिसतत्त्वः अने-
नाकाशीयपदस्य व्यवच्छेद्यं दर्शितं शिवतापीति इदन्तात्तु
मीलने प्रमातृपदे ईश्वरतापीति इदन्तोन्मीलने प्रमाण
धर्मोत्तरादिति तस्य भगवतो याकर्तृताहमिति स्वातन्त्र्यात्
मासा यत्रोपचर्यते समारोप्यते स्पर्शादौ सोऽक्षो यतो वे
द्येकरूपस्तत्स्वतादात्म्याविभागगामिन्यो ते शिवतेश्वर
ते अपि तच्छरीरप्रभृतिगतस्पर्शशब्दरूपरसगंधादिनि
ष्ठमेव देशकालसंकोचं भजत इव त्रुटिरिति प्रकाशभा
गेन पश्यन्तीति विमर्शांशेन तत्र एव प्रमेयता वाच्यता
च भावग्रथस्तुक्ता तयोश्चेति निर्धारणपदेन पूर्वकस्यैवा
र्थस्येदं स्फुटीकरणमिति दर्शितं तत इति यतः प्रमातृप्र
माणे देशकालावच्छेदवती ततस्तयोरायता वेद्यसंवित्तिस्त
थैवाभाति मुख्यमिति प्रमाणपदे यतः करणतायाप्रवं:
स्थानं तत्तु कर्मता प्रमेयता तत्रावस्थिता तदा मुख्यसंपूर्ण
वेद्यवेदकतालक्षणा मायाप्रमातृत्वे नास्ति वेद्योपधानेस
कोचात्तु तदपूर्णमस्त्येव मंत्रात्मनेति शुद्धविमर्शरूपेणे
त्यर्थः असाविति संकोचः तत्रेति ककारादिविभागात्म
कं प्रतिबिम्बकल्पमिति प्रतिबिम्बकल्पतयैव सर्वस्यापि
भासनमित्याकूतं अत्र शारीरघटाद्यपि हि वस्तुतः प्रतिबिम्ब
प्रायमेव तत्र स्फुटं पृथग्भावेन वेद्यत्वेनैवभासते नन्वेवंवाच
कपरामर्शनिष्ठः ककारादिविभागः एतदाह तत्तु विजातीय
मिति पृथक्कारारम्भत्वेन संवेद्यमिति यावत् ॥

नरीति वर्णविभागरूपं कार्ये मन्त्रत्वमितिकर्म दृष्टान्तो वैध
र्म्येण प्रतिबिम्बकल्पत्वेन भासमानत्वादिति हेतुमुक्त्वा हेत्वंत
रमप्याह स्वप्राधान्याभावाच्चेति शरीरादिमायाप्रमातॄणां
परमास्थ्यावस्थानत्वेन भाति समस्तानां तदङ्गभीरुस्वभाव
तात् ककारादिवर्णग्रामस्तु विद्याप्रमातॄणामुपाधानवत्त्वा
याप्रमातृगतनीलादिभेदवद्विजकल्पोपकरणतया भासते
संवेदन एवात्मताभिमानो ह्येषामुपाधानतामेव दर्शयति
केवलमिति ननु कर्मतत्त्वशरीराणीति तावदुच्यते तेषां
त्वविद्यामयानां निर्माणे किं कारणं प्राह परमेश्वरेच्छेति क
मोघनपेतामेव प्राह साचेति इच्छा एवं विषयहारेण पुष्टं
मायाख्यमलस्वरूपमुक्तमुपसंहरति उदयमिति परमिति
केवलं एतदेव स्फुटयति नन्विति ग्रन्थे इति बोधानामपि
कर्तृत्वमेषामित्यत्र एकवचनान्तमिति हेतौ देहादिरित्येत
दपेत्यत्र चकारेण स्फुटत्वेन वाक्यभेदो ज्ञानीत इत्याशयेनैव
मुक्तं तत्रेति मायाविमोहिनीनामकलायाः कलनं स्थितमि
ति हि श्रीरुद्रयामलसारवाक्यं तद्वशादेवेति विवर्तपरिणा
मकार्यकारणतावादाद्धि वितत्य निराकुला इति भगवच्छक्ति
रूपैव मायाविपर्यासान्तरात्तेपि मध्यमोक्तविपर्यासक्रमेण
स्वात्मनि भावात्मानः करोतीति १४९ नन्वनात्मा शून्यादिः
रात्मतया यावदभिनिविश्यते तावद्विद्रूपतयाभिनिविष्टो
भवति सा चानाहतेति पुनरपि विशुद्धैश्वर्ययोग एवास्य युक्त
इत्याशंक्य तत्त्वपंचकसंवलितमुक्तत्वप्रदर्शनेनापोहति
यच्च प्रमाणेति स्यादेष दोषः यदि प्रमातृतायां शून्यादिमेय
तां न स्यात् नन्वेवं नयाहि सति व्यतिरिक्ते भेदे कथं माता भवेत्

प्र
वि वि
५.५२
502

पारिमित्यं ह्यत्र प्रमेयत्वेमात्रेऽतिरेके च प्रमाणः तदेव च काला
दिपंचकंचुकनिचितत्वमिति सूत्रार्थः तेसंतिष्ठावतारयति
इदानीमिति स्यादिति अपित्वात्मबलस्पर्शादितिनीत्यासेति
अहमिदमिति येस्वसंवित् अत्रेति शरीरेवस्तुनेइति कलो
हलितमेतक्षेत्रस्तु सूत्रेतद्रूपतेति आत्मरूपता हि समस्तपि सं
सारित्वेनिवर्तेत एवशरीरेऽहवस्त्रादाविवमन्यपदेनापूर्ण
प्रमाणिकत्वमाह शंकितानवस्थापरिहाराशयेनविशिन
ष्टि नित्योदितेत्यादिना अतथेति तदधीनत्वादेवात्रमक
र्तृचैतन्यरूपलक्षणं योजितमत्र ननु स्त्रीबालादीनामुर्यष्टका
दिन भवेत् आत्मा शरीरमेवेत्यक्ता ततश्चापरलोकिनस्त
स्युः अत्राह शरीरात्ममानिनामपीति एतच्चप्राग्व्याकृतमे
व अयमेवस्वनात्मन्यात्माभिनिवेशावतरणक्रमइत्यत्रा
ह्यदशाविषयनिषेध्यापसरणेनेपरामर्शविशेषमपिप्र
दायमभ्यासवशादृच्छति येनत्यजसित्यजेतितदानेत्य.
पिविशेषस्यास्तमयाद्धि स्वहमेवचिन्मात्रंभाति केवलंत
त्संस्काराद्भेदाचेति स्मृत्यानादिसम्भवः संकोचितमित्यन्त
कर्तृपदं अनुभूतेत्यादिकर्मपदं सेति आत्मरूपतायत्पदे
नक्रियापरामर्शोपिक्रियायाः कारकोत्कलितशरीरत्वात्
करणस्यमहत्तस्यपरामर्शोऽचितएव ननुवासनापेक्षमेत
ल्लिंगं पुनःसंस्कारापेक्षयापुनर्निर्देशान्तरप्रसंगात् अथवेति
वेदनयावेद्यं अपितुमायीयातावदागृहीतरूपासादनेनैवप्र
कैत्यर्थः तथाहि व्याख्यातातावत्संस्कारवन्तमात्मानंमत्वा
नैवाख्यातं उपच्छति ननुतान्संस्कारान्स्वयंवेदयमानः कृ
शादेशकालनियताशेच सोऽहमिति तावत्संस्कारस्यापवाहमिति

परामर्शाङ्कुरैर्वेकोपायुदयायुक्ताः स्फुरत्तसंकोचसंस्कारव
ती याचित्तन्मयतयाप्रलीनमप्रमातृतशब्दादिरूपविशेषमे
कमिति पूर्वदृष्टकान्तरादेर्भिन्नं द्वितीयविपर्यासस्याद्यविप
र्यासान्तरीयकं स्वरूपं विषयद्वारेणोपसंहरति तदेवमेत
दिति प्रथमविपर्यासभिन्नो रूपान्तरमिदमित्यन्तपदेनास्म
त्पदेनाह एवं मातासमेयः सन्नित्यन्तं व्याख्याय कालादिः
केनाद्रियाख्यातमारभते अन्यदपीति इयमप्याशंका न
नैवपरिहृता यदुतकलननियमनादिकार्यमशेषप्रमेय
निष्ठं दृश्यते तदमी कालाद्याः प्रमातृधर्मत्वेनैव किंतुच्यते
इति पारतन्त्र्यं तत्त्वान्तरसम्बन्धे सति समर्थनास्वयमसमर्थ
तावमभूत्वमित्यनयाभंग्याभेदनोपादानं तत्र विशेषणताति
रेकेण कालादीनां स्वरूपमस्ति विशेषणं च प्रतीत्या रूप
मेव तथा भवति तत्र दंडादी निर्विशेषणान्यपि नाभासनं
क्रियां भिन्दन्ति तथा भवन्ति अपितु पुरुषादिकमेव विशे
ष्यं संयोगादिद्वारेण ततस्तेषां वस्त्ववच्छेदकतया हूर्वं प्रमा
तृभागावच्छेदउपयुज्यते दण्डययमितीयते वक्तुमसम्पूर्ण
त्वात् कालः पुनः स्फुटास्फुटरूपतायाभासक्रियामेवभा
वाभाववतीं निर्भासयता परमेश्वरेणस्पृष्टः सचाभासनं
क्रियायैव भावाभाववतीदन्ताभागपतितत्वादहमित्यव
भासलीनत्वाच्च प्रमातर्येवप्रथमं स्फुरति तद्द्वारेण तु घटा
दीयो ह्यमयमिदानीं स्फुटरूपो वर्तते परिक्षीणो भूत्वा स्फुलत
रश्च भविष्यामश्चागत्यहेतापयोगेन तत्तद्रूपाविनामीघ
टादयः स्फुटरूपा वर्तमाना इत्येवं वर्तमानात्मकत्वक
लावपिपरिग्रहेणभूतभविष्यतोः प्रमातृगतयोरेवमतो

प्रमेयेविश्रांतिरितिप्रवहद्रूपः कालःसर्वप्रमएवकंचकत्वेन
उक्तइत्यागमेष्वतथाभिदिष्टः नियत्यादेरेषएवनयः एवे
ति वतवतेति किंचिदिति द्यइति आसेति हि विमर्शाभिप
निरागकलाकालविद्यात्मानः संविद्येवनवेद्ये उदयंवर्गो
नस्वतंत्रः नापिसामान्येनप्रमेयधर्म इतितात्पर्यं तदुक्तंश्री
कालपादाया यावत्येव हि संवित्तिरुदितास्फुटा भवेत्
तावत्क्षणोवर्तमानः कल्पोवान्यद्धयावधिरिति एतत्प्रा
चेत्यादिनास्फुटयति सर्वमिहाभासरूपमित्युत्सर्गः नकिं
हत्ताबाभासपदेनेत्याशंक्याह सर्वहीति वहिर्वेत्त्वितिसक
लसाधारणतयैववाह्यत्वं साचनविशेषणतायां नीलस्या
पिकंचित्प्रतिविशेष्यत्वात् उत्पलस्यचविशेषणत्वात् एत
च्यसमुन्निः विशेषणविशेष्ययोरुभयविशेषणत्वादि
त्यादि देवदत्तप्रतीतीति प्रप्रतीतत्वेनैकार्थक्रियासंबंधेचोभयत्र
योज्यं नन्वप्रतीतेसावच्छिदर्थक्रियान्तरं तत्करिष्यती
त्याह नचेति नीलं हि एथगेवस्वखड्गःखादिकंजनयन्नवि
शेषणत्वत्पत्ते एतन्निदर्शनेनस्फुटयति नहीति इदंप्र
तीतेउपयोग्यानिनीषितपुरुषावच्छेदनादित्यर्थः तथा
हीति एवंच सतीत्यर्थः प्रमातृभूमौ प्रमातृभूमाविति
वीप्साव्याप्तीभावेन साधारणतारूपवाह्यत्वाभाव उक्त
पकतामयइति सम्बन्धरूपः प्रथतेइति अनपह्नवनीय
तथावस्त्वेवतात्कालिकइति तथैवतदास्पष्टः अन्यदाह
तस्यैवप्रमातृस्वभावन्यथास्फुरत्येव एवंविशेषहंतातेप्र
कृतउपयोजयति ततश्चेति यतएवंभूतोविशेषणमात्र
स्यापिहनानन्तरतोहेतोः कालादीनामाभासनंक्रिया

मुखेन प्रष्टॄणां कथं प्रमातृप्रतीतिर्बहिर्भावः प्रावेशते·
त्यर्थः आदिपदान्नियत्यादीनां श्रुतपवागमेषु रागेणारं·
ज्जितात्मा सोकालेन कलितः प्रोक्तो नियत्यायमितो भूयः पुं
भावेनोपबृंहितः कलोद्दलितचैतन्यो विद्यादर्शितगोचर इ
त्मकं निपातावमर्शनीया नियमादयः सज्जातश्चाघवम
ष्पारागादयः संवेदनगताः सन्तः संवेद्यान्तरशान्तीति प्रष्ट
घाकिंशानामिति प्रमातृशक्तिरूपाणां विशेष्यस्यावि
शेषणक्रिया वच्छेदनलक्षणा तस्या या प्रतीतिस्तच्चानुप
योगिनां ततो बहिर्भूतानां सिद्धिरेव न संभाव्यते देशादिवा
ह्यविशेषणावस्तुतः प्रमातृधर्मत्वमेवैषामुचितमितिभा
वः कालस्येति सर्वसामान्यमपि विशिष्यते इति यावत् मा
नपदेन सर्वप्रमातृसाधारणं यन्निराकृतं श्रुतपवाह आ
भासोपीति हृवतपर्वतावदवच्छेदनक्रियारूपे चार्थक्रिया
त्तं आभासनमपि दण्डवत्कालस्पृष्टयक्तर्वसाधारणेपन
वहिरस्ति ऊन्नहूतमल्लिकाकृदजकमलमालतीसन्तानेहि
क्रमिकं पश्येत् ननु तत्प्रतीतेर्बहिर्भूतं दण्डमिव कालेक्रम
रूपं एतदेव श्रीपूर्वागमेस्वरूपलक्षणदाधाभेदात्ममात्र
पेतभेदान्तरोत्पादर्शितं शक्तिमच्छक्तिभेदेन धरातत्वेस
रूपसहितमित्यादौ ननु भवतु एवं कालस्य प्रमातृलग्नत्व
परमेश्वरस्य तु कथं तच्छक्तियागइत्याशंक्याह विचित्रेति
विचित्रानाभासनानाभासोपबृंहितानाभासातुन्त्रादिमया
न्यतः परमेश्वरः करोति ततः परमेश्वरस्य शक्तिः प्रमातृ
धर्मकालस्तत्स्थापयति ततः प्रमातृधर्मः कालः प्रमातारि
कलितः सत्कलयितानाकालेन कलितश्चतुरकः परमेश्वरस्य

६
प्र वि
४८
504

तकालशक्तिः क्रियाशक्तिः प्रागिति तद्रूपेति प्रागिति क्रमो
भेदाश्रय इत्यत्र प्रकरणे एष एवान्यत्र कञ्चुकवर्गे हन्तान्त इ
ति दर्शयितं नियतिव्याकर्तुः याहृतिस्तां विवृणोति कार्या
कारणभावश्चेति कार्यलक्षणशब्देन तद्भाव उच्यते स च क
र्तृत्वपर्यवसान इति तस्य कर्तृत्वस्य कालशक्त्या वक्ष्यमाणया
दत्तस्य यो नियमः यतो नियम्यमानता पूर्वक नियन्तृत्वलक्ष
णाद्धर्मात्मा नियतिः प्रमातृधर्मः तच्छक्तिस्तु क्रियाशक्ति
शेषरूपा भगवत एव चिद्रूचिता कर्तृता चित्कर्तृता तथेति
नियतिविषयत्वे कार्याकारणशब्देन तदाभासः तत्रायं
मर्थः वस्तुतो भगवानेव तथा निर्भासत इति स्थिते नवी
जस्याङ्कुरं प्रति घटं वा पादनतापि स्यादिति तुल्यमसामर्थ्ये
द्वयोस्तथापि सर्वप्रमातृसाधारण्येनैव भाति बीजमुत्पाद
नमङ्कुरस्य न स्यात् साक्षात् घटस्य न बीजमिति एवंभूतो यथा
भासविषये नियम्यमानतालक्षणो धर्मः स वस्तुतः प्रमात
र्येव न प्रमेये तथा ... मात्राभासनद्वारेणेति प्रमातृधर्मो
नियतिः सर्वज्ञेनोक्ता यदुक्तं नियत्यायमितो भूय इति सा
धारणमेव दर्शयति तथेति अनेनैव कर्मतत्फलनियम
व्याख्याने सिद्धे पृथक्तदभिधाने संसारहेतुत्वान्तेन तत्प्राधान्या
त्. तदाह एवश्चेति हेतोः कर्मशब्देन चेत्क्रिया तदा फलं तत्
कृतश्चात्मवर्ती संस्कारः अथ स एव कर्मशब्देन तदा फलं स्व
र्गादीति उभयथाहृतिर्विहृतानागमाचष्टे कर्तृरिति मत्स
रादेरिति अभियमादौ भरतादौ च दर्शितं तस्मिन्नवृत्तिगणो
रागमूल एव ॥ अत एव वीतराग
इति ॥

द्वेषो द्वेषमत्सरादिविगमोप्यस्य प्रतीयत एव ननु वैराग्यं
शैवदर्शने बुद्धिधर्मत्वेनापि वक्ष्यते तत्किमन्येन रागेण का
रणाह्वानं तेनान्यत्तदस्तीति युक्तमिच्छाद्वेषयो रागस्य गुणत्व
मित्याशंक्याह एतदिति बुद्धिगुणश्चेति तस्मात् अन्तरत्वे इतिरा
गइत्यनेन कंचुकत्वेनेति यावत् तथाहि बुभुक्षापिपासा
स्त्रीसंभुक्तालक्षण उल्लासो यस्तदवैराग्यं तन्न च भवति
द्वेष्यादरादेर भिष्वङ्गो भवत्येवं भूयादेतन्ममेति प्रतिपत्तेः
ततो रागतत्वं प्रधानभूतं तस्य तु वहिष्पर्यन्तता प्रसरणाय
त्समप्यतये द्वेष्यादरादीनां अभिषङ्गभविष्यति तदवैराग्यं य
मीत्येषोप्यभिषङ्गवासनाया एव पल्लवा इति समस्तोयं
रागवर्गः तेतु विशेषोल्लासात्मानो बुद्धिधर्मत्वेन गणिताः
ततएतत्सर्वमेव मायामूलत एवाक्षिप्तं तथा च दीक्षासमये
तदन्तर्वर्ति न एव सर्वस्य शोध्यत्वमश्री स्वच्छन्दादिशासनेषु
निरूपितं मूलच्छेदस्य पुनः प्ररोहाभावात् रागनियत्यादे
उत्पल्लवितमुकुलितप्रायं बुद्धेः पुनः फलितं च फलितत्व
तदेतत्सर्वमाह बुद्धिगुणश्चेत्यादिना विषय विशेषइत्यते
नरागं व्याख्याय कर्तृत्वं तत्वात्मनाविशाभित्तस्य चैतन्यस्याभि
व्यकार्यत्वेयविषयस्याभिव्यंजनायद्वयोर्व्यापार इति सममे
वकलाविद्ये निरूपयति सूत्रादेश्चेति चोधर्मिणि धर्मान्त
रेस्य पुष्प्रिनोति चैतन्यमनिरुद्धं सततानाहृतं न च किंचिभि
व्यंजनेनेत्याशंक्यसत्यमेवं परमार्थे चैतन्ये भिन्नविषयक
ल्पितचैतन्यचर्चा पुनरियं वर्तत इत्याशयेनाह चैतन्यं चेति
इहेति पुंस्त्वेन हि वत्ताभावे हेतुमाह चिन्मयत्वादित्यादि
नाकर्मकस्यापिति पारतन्त्र्येण प्रकाश्यमानत्वं चिदित्या

६
त्र वि
५०५
505

दियाहकाद्भिन्नमितियावत् अर्थान्तराग्राह्यान्तराहित्व
णं ततएवाविभक्तमपिग्राहकग्राह्याभ्यांविभागमापादितं
तथाभावेपिस्वयमिति स्वेनरूपेणसंविन्मात्रमयतोप्रका
शमानत्वेनानुन्मुक्तदपिनीलादिजडमुच्यते कुतः पदार्था
न्तराणांविविक्ततयाभेदेनयत्संवेदनंवैचित्र्यंतत्रासमर्थ
त्वात् तत्रच हेतुरिदन्तेत्यादिनोक्तः अभेदप्रकाशनेतु
शून्यत्वमितमेवशावशरीरघटादावपीति ननत्कृतोलो
लौकिकोयंजडाजडविभागइतियावत् तदाहन्तवितिनत्व
नेनप्रकारेणहेतुनाजडमुच्यते संबंधः परस्पभिन्नस्यसतो
यत्संवेदनंकर्तव्यंलोकयात्रोत्थापकंतस्याकरणात् न
केवलंशून्यादावेवंघटादावप्येवंइत्याह अतएवेत्यादिप
रार्थीनतयेत्यन्तेयदर्थंमियहिचारितंतत्प्रकृतमनुवभा
तिविघाकलाभ्याश्चिति सर्वशब्दोयोग्यतोप्रमाणेवैचित्र्य
णाह अर्थशब्दोभेदं नतुतेविघाकलेतत्वकर्तृत्वेव्यक्तेश्च
तू वास्तवेनरूपेणभेदात्मनाव्यक्तो अत्राह मायीयत्वा
दिति ननुभेदेनुते सर्वविषयेस्ता उच्यते नियतीति पूर्वा
हि कंचुकानिमोदकवत्सवदन्योन्यानुग्रहलक्षणमेल
नेहन्तीनि ततएववेष्टित इत्युक्तं आगमेषुतएवामीषां
विचित्ररागयोर्वापर्यक्रमेणाभिधानमविरुद्धं तथाहि
मालिनीसारे हृदयेयःस्थितोग्रन्थिरथ ऊर्ध्वनियामक
इत्युपक्रम्योक्तं कदलीगर्भदलवन्मोदकादिरसादिवत्
कदम्बगोलवद्विश्वात्मकमात्केचकसंभवइति एतेनैवाशयेन
ह नचावेति इयतावत्प्रयत्नेचागमान्भट्टश्रीलेत्र
ऊर्ध्वत्रिकोनियमवान्यः सोहमिति एवंमधुनेदं विदत्
तुसरणनिमित्तमवधानेनोपायेनः॥

नास्वन्त्वमाद्रियते यदित्वादरोऽत्रभवेत्तदेतद्धितानयेदि
तिकिंतदाह अयमेवक्रमोन्यथावेति उल्लासस्यचित्र
क्रमत्वात् तत्त्वारारणामिति अधिकानांवाग्रहणानो
पयोगोवेति अनादरेहेतुः निष्प्रयोजनत्वादिति उप
तत्सौंदरइत्याह एतावविति आदन्तव्यताद्याहेत्वमा
ह एतावचेति मध्यवर्तिनस्तुप्रयोजनशून्यतां दर्शयति
अन्याविति अनुपयोगीतिहृदेशसंबंधः कथमनुपयोगि
आह इदानीमित्यादि एवमित्यनेन संविदितमिति सद्भावो
नेनलक्ष्यते ततश्चायमर्थः इदानीमियदस्ति अन्यदाव
धिकमपिस्यात् अतएवपदान्तरमाह अवधानाभावादि
त्यादिना इदानींषष्ठविषयादिसन्निहितमपिअसंवेद्यसा
दितिशंक्यतइव तदवलोकनेपिसमभ्रमादिविषयसंभा
वनानिवृत्तिः तदाह अचिरेत्यादि एतेनषष्ठोडुपादिभे
देनमध्यमप्रमेयगणेनवालुकागणनप्रायमशक्यंनिरु
पयोगंचेति दर्शयति पार्वतादीनांपार्थिवादिरूपविलक्ष
णानामपिसंभवात् एतदेवसंवादयति तदुक्तमिति प
ह्यते यदस्माकमभिधेयंतज्ज्ञातिचोपपद्यते चोपयुज्यतेच
नचमध्यमप्रमेयासंवेदनेतस्य सर्वोधिपदवर्तिनःकाचि
त्खंडनेत्याह इयन्त्वित्यादितथानूपत्वमिति स्वात्माज्ञा
ताकर्तास्वतंत्रइत्यनेनविनानकिंचित्प्रकाशते अन्यहाक
त्व्यमानेहृदेतिएतत्वित्याशयेनाह नपीयमिति यत्रत्वेतदुप
योगिनचदीतादिविधौसर्वमेतन्तुनिरूपितमेव ९॥
प्रमेयेष्वतिरेकिणीत्युक्ते तत्प्रमेययुगलकेनाह त्रयोविं
शातियेत्यादिनासंक्षेपेणस्पष्टमेतत् प्रपंचस्तुविद्रुतावे

प्र
भि वि
५०६
508

वास्तिइति इष्ट्यङ्गविमर्शं प्रमेयं वचस्त्रणोपयितुं चोद्येनो
पक्रमते नन्वित्यादिना भवेदितीत्यन्तेन अतएवेति यः सा
मान्यलक्षणसंग्राह्यनैवोचिता ततइत्यर्थः एतदेवव्यति
रेकेणाह अवास्तवेचेति ननिति असंवेदनीयत्वादेषाम्
एतच्चकर्मेंद्रियविषयेपिसंचरणीयं करणत्वमप्यनुचि
तचितमेषामितिदर्शयति तथेति कालकलादयोहि प्र
प्रमातृतांशरयन्तः प्रतिप्रमातृभिन्नस्वभावाः क्वचित्तन
टमल्लप्रेतादौ ईश्वरेच्छयानावन्येकीभवन्त एकविषयतया
वान्यत्रवक्तोन्यन्नियत्याकार्यनइत्यादिस्थित्याकरणांशा·
गामिनस्तत्किमन्येनकरणेनेति प्रमेयं चोदयित्वावचन
चोद्यमाह तथेत्यादिना अचेति प्रधानस्यैव परामर्शाद्यु
क्तः नचतस्योदितोनिरावरणयोगादितिभावः उक्तमि
ति इदमपि वचनचोद्यमेवेत्याशयः इतिचोद्यसमाप्ति·
सूचकः पुनरपीति विभागविभागोद्यमितियावत् भुव·
नादयइति आदिपदाद्देहभेदादयः तथात्वेनचेति करण
त्वेनचेतिकरणत्वयोगिवेद्यत्वेन बुद्धिपरिणामोपयोगी
बुद्धीन्द्रियाणि वाह्यस्यापि तत्परिस्पन्दादेर्घटादिपरिणामा
यकर्मेन्द्रियाणि एतच्चापिपरेणाह नहीति एतच्चादिसि
द्धान्तमेवस्मारितं इहकारणानीति असंविदितस्या·
पिवीजादेरङ्कुरादौकारणत्वेवयतः अनुमीयतइति तेनवा
स्तवंप्राधान्यमप्राप्तस्य एतमप्याश्रित्यपरामर्शोइत्यर्थः ताव
नेति नवास्तवं वचनहृत्याबाध्यत इतियावत् एतच्चप्रौढ
वादित्वेनोक्तं एवंतु सत्येनेनन्तु शाक्तमेव सत्कार्यकारणात्म
केवलनयोर्विशतितायामनसमूलकारणं,

तत्सर्वं प्रमेयमिति साक्षात्सदस्यव्यवच्छेदं दर्शयन्प्रमात
रिप्रमेयतां निराकरोति विकल्पज्ञाने हीत्यादिना नन्वेव
वमेव प्रधानस्याप्यसत्ताकार्यतास्तु विकल्पमात्रवेद्यत्वा
त् प्रतक्षैवं यत्कापिलैरिदमपि प्रसंवेद्यपर्यन्ततयैव गणित
मिति योमन्येत तं प्रत्याह प्रधानमिति पुनःशब्दः प्रमात
रस्य विशेषद्योतनयत्सातोऽहेयतां स्पष्टयति अस्मदाद्यपेक्ष
यापि प्रमेयतामप्याह अनुमानेत्यादिना एतदुक्तं भवति
प्राप्याविकल्पज्ञानइदमिति प्रकाशमानो मूलपरामर्शाह
न्तात्मन्येव प्रमात्रैकपरमार्थे विश्राम्यति एतच्चोक्तेनाह
न्तादिपरामर्शभेदादित्यत्र प्रधानं तु विकल्पनिर्भासमा
नमपि साताहेयाशेकरूपमेवेदनैकरसतया भातीति परा
मर्शैक्यात्तदेवतत् एतदप्युक्तं हृगन्तिकतयेत्यत्र नन्वेवं
स्वकेठे नैव कस्मादस्य प्रमेयतानोक्ता अत्राह केवलमि
ति अथैकप्रहारेण सर्वं परिहरति सर्वमेव चेति अतप
वेति यतो लोकयात्रोपयोगपवप्रधानभूतं ततश्चायमर्थः
अन्यथाहि सूत्रानुसारेण करणवर्गश्चादौ निर्देश्यो भवेदि
त्याहूतं वर्गिप्राधान्येनापीति चोद्यबीजं यत्स्मरन्नदेववस्तु
तः समाधानमिति दर्शयति बहुवचनेनेति नहि वर्गि
भ्योपरो वर्गः कश्चिदिति यावत् पृथग्वेति बहुवचनेन लो
कप्रसिद्धो भावग्रामः समस्तो गृहीतः वर्गशब्देन सर्वे सम्प
वेति यावत् सूक्ष्मस्य स्थूलतः प्रतिपत्तिरुत्पत्तिस्तु विप
रीतेत्याशयेन सूत्रहृष्टोः क्रमविपर्यायेण निर्देशः मह
त्तत्त्वमिति वा चोपलक्ष्या महत्तत्त्वे मेघास्ततोऽहंकारो निर्देशः
महत्तत्त्वमिति वा चोपलक्ष्या मत्तानिः सदसतः सत्तामात्रेम

प्र
भि वि
५०७
507

रूदभिव्यज्यते ततोमहात्मीसंविदः सिनेत्यादिकापिलोक्ति
स्थारणे ननुद्देर्मनश्चत्तुर्वागादिवत्करणस्कन्धनैव अपितु
कारणस्कंधताापि अस्तीति समर्थ्यते कार्यत्वस्पशाद्याका
शादिरूपपवविषयोयत्रकारणत्वनास्तितेषामिति कर
णदशैकभाज्मपरिणतः स्थूलाकाशादिधर्मेनारहितार्थ
मिति यावत् तथेति कार्यतयाप्रकारान्तरेणापिसेवसा
ख्योक्तीः समर्थ्यते कार्यत्वंचेति भोक्तृभोग्यपनत्करणावि
चारेहिकरोति भोगक्रियाविश्रांतः तथेति कार्यत्वेनः
वृत्तिगतंक्रममुत्पत्ति निरूपणेनसमर्थ्यते कार्यंचेति आ
विर्भवदिति व्यज्यमानतयासत्कार्यवादमाह सूक्ष्ममिति
नपरमाणुरूपं अपितुविभागरहितंनपरिपेलवात्मकंका
र्यावगीपतयाव्यापकरूप स्थूलताप्येतद्विपरीतामन्त
व्यामात्रपदेश्याचेष्ट विशेषरहितेति एतत्कारणरूपप
रेसामान्यंमरूपतैवघटादेः साहश्यलक्षणत्वपरंसामान्यं
घटानामिवघटत्वमिति पुरस्तादिति योगिनिर्माणताद्
सूत्रेषु सचेतिक्रमः नियतिशक्तिमेवप्रमाणतोदर्शय
ति आगमतोपीति अनुमानमवडवेलमित्याह तत्वसङ्कृ
दिति नत्वागमान्तरमन्यथाक्रमप्रतिपादकमप्यत्रना
स्तीतिऊतोनिश्चयः तत्रायमेवक्रमोनियतेरिति इरव
गममेव अस्त्वेवंप्रकृतेतुनकाचिन्म्लानतेत्याह नचासिद्धेपी
ति संवेदनस्या नपक्वनीयस्यत्संवेद्यात्मत्वे यत्त्वतत्संवेद्याः
भावसंयोजनवियोजनवर्हितंतः भावापादनादिसातेभ्योग
स्वरत्वं तत्सर्वस्वप्रकाशमेवनतुमूर्छमन्त्रपदेशतयाप्रमेयमि
इत्यहृतं तस्यनहानिः काचिदसिद्धेपिसत्वसंख्याक्रमनियमादे

इति संगतिः एतदुक्तं भवति संविदः सर्वशक्तितामेव प्रथ
यितार्थः सर्वत्र मध्यवर्तिक्रियत्वादिति गंगागतसैकतक
णगणनेऽक्षोपयोगिपरयोगिनः यदाह कीदृक्संख्यापरि
ज्ञानं तस्य न '' प्रयुज्यते इत्यादि तन्मात्राण्युपसंहरन्महा
भूतान्यासूत्रयति तदेवमित्यादिना सन्निवेशोत्थाशयसंग्र
हाय अन्योन्यसंपर्कं चेति भूतान्तरविषयं एतद्द्वयनिरूपण
वेति एकैकगुणमहाभूतदर्शने द्विगुणान्तरोपलम्भोऽभू
तान्तरसम्पर्कतः इति सन्निवेशात् इति भूतद्वयतास्थूला ए
कैकगुणसूक्ष्मता एतेषु परस्परसंपर्कस्तन्मात्राणां आका
शात्तु सन्निवेशापवस्थोत्पत्तिः संपर्काभावात् चेष्टाव
हनक्रियावाधोः आदिपदात्स्वक्तिसंग्रहः एतयोऽपि तेजोम्बु
धारणाहननयोर्गृहीताः यद्वेति आकाशसंग्रहायपसंत
रं एतदेव स्फुटयति सन्निवेशविशेष इति नाशान्योन्यसं
पर्क इत्येवकारः शब्दपरिणामस्योभयथावकाशदात्
त्वसंभाव्यते वाचकशब्दस्य नादात्मनो विचित्रसदयसमर्ह
स्तुशब्दत्वमूलानेकवर्णग्रामबीजभूतस्य यतोऽनेकवा
व्याप्यासवतः सर्वावकाशदानत्वमत इत्येकः प्रकारः वा
चको वास्तु अवाचको वास्तु अवाचको वा खटखटादिर
पि शब्दः सर्वावकाशसहः स्पर्शसहचरितान्वहितो भूतेना
भावादप्रतिघातको यत इत्यपरः प्रकारः तन्निरूपयति ना
दात्वित्यादि यद्वेत्यादि च अपीति पृथिव्यादीनां तदेवकाश
दान्तरे नैव संभाव्यते कथंचिद्दृश्यमानानापि नैतेषां तत्स्वभा
वः अपितु तत्सहचारिणा आकाशस्यैवेत्यर्थः तत्त्वान्तरा
त्मन पृथिव्यादिगुणस्य स्पर्शसहचारिणः प्रतिघातक

तस्तत्र आकाशे प्रवेशो यस्य न स्पर्शसहचारी स शब्द इति त
स्यैवाकाशस्यैवावकाशदातृतादृष्टिर्नन्तु शब्दगुणानामपि
भूतान्तराणामिति तात्पर्यं स्थौल्यभाग इति घोषो सन्निवेशा
त्मना सुषिरस्वभावस्तदाकाशमेव नन्तु तन्मात्रे यत्त्वसन्नि
वेशात्मकं तोभयरूपं स शब्दो गुण इत्यभिप्रायः अत एवे
ति यतः शब्दसन्निवेशरूपता तत्राव्यभिचारिणी ततो हेतो
र्वायोराकाशमेवैकोदेशः स्वरूपात्मत्वेनाव्यभिचारात् प
तदवलोकप्रसिद्ध्या प्रमाणयति तथा चाङ्गुरिति सर्व एव
हि लौकिकालौकिकः खवायोरव्यभिचारमिच्छति इत्याश
येन नित्यमेवाविक्तत्वमरुदम्बरयोरिवेति यथाकाश
स्थितो नित्यं वायुरित्यादि च नियतमिहन पठितं पतान्त
रमाह अथवेति अत एवेति यतः शब्दभाग आकाशपद
पतितः मतान्तरेणाप्येतत्संवादयति तथा चेति यदि
ह्याकाशमेव गुणान्तरस्पर्शाधिक्याद्वायुरित्येषा दिङ्भ
वेत्तदा शब्दस्पर्शाभ्यां स्पर्शादेव वायोर्जन्म एवमुत्तरेषाम्
ततः सर्वस्य महाभूतस्यानन्तरप्रतिकथं कारणत्वस्यादित्या
शयः ननु किमर्थं शैवसांख्यदर्शनक्रमाङ्गः उच्यते अस्य
क्रमस्येति पृथिवीधारणायां जितायां पृथिवीमपि जल
विलीनां भावयन्योगी जलमेव पश्यंस्तत्सिद्धीः प्रतिपद्यते
यावदाकाशे कलीनानि सूक्ष्मैकताभाजि सर्वं महाभूतानि
भावयन्नाकाशसिद्धीः लीलाकालेन च विसृष्टं पूर्वतत्त्वं धरा
स्मृतं च योजनीयमिति योजनाश्च निरूपितं येषामव्यव
सायास्ति न विधांप्रत्यशाकितः श्रोत्रापायमिदं तेषां विधा
नश्रदितं गुणारीतिस्त्यागमेदीलायोजनं सर्वात्रयादृक्क्रमम्

तत्कारणे कार्यस्यप्रविलयो योजनं चयुक्तमिति ·· मत्वा
यंवज्ञतरागमानुगृहीतः पद इति यावत् एनामेवपतद्द्वय
येलीभूतान्तरेषु दर्शयति एवमेवेति एकगुणत्वेभूता·
नामित्येतत्संवादयति अतएवेति विषयवती प्रवृत्तिरुत्पन्न
स्थितिनिबंधनीति सूत्रभाष्यकारः पृथिव्यादितत्त्वेषु एकै
कगंधादिगुणसंवेदनमेवन्यरूपयत् श्रीमतंगशास्त्रेपि·
तुभिन्नात्स्पर्शतन्मात्राद्द्विगुणो वहतो मरुदित्यादियन्त्ये·
नस्वभावतएकैकगुणत्वपूर्वभूतान्तरसहनयोगात्द्विगु·
णत्वादिनिरूपितं तान्येवेति सूत्रं व्याचष्टे तान्येवचेत्यादि
ना ननु वस्त्वन्तरमित्यन्तेन अप्रमत्तत्वादिति सांख्यानेषा
महाभूतद्वारेणैवोपलक्षणमन्यथा मायातत्त्वमेवैकं शिवत
त्त्वमेवैकमिति वक्तव्यं स्यात् नन्वेवं घटादयोपितत्त्वरूपतया गण्य
न्तां नेत्याह अप्रमत्तेति परत्वं प्रकृत्यन्तसूक्ष्मतातन्मात्रान्ते
सूक्ष्मताधारान्ते पूर्वपूर्वसंचयेन गुणाधिक्यानन्तरमेववर्णि
तत्वात् ततः परो विभवो देहघटादिः नात्र सूक्ष्मतादधिकम् इति
तेषामिति निर्धारणे नन्वेषां रूपादिषु पंचानामित्यालोचने
द्रियतो विना न बुद्धीन्द्रियतेति चोद्यं परिहरन्तु द्विवोधोपयो
गितयेत्येतदेव स्फुटयति इंद्रियाणामध्यवसायात्मतयार्थे
विषयबोधो निष्पद्यते ततो बुद्धीन्द्रियता ननु तानि स्वालद
एपनाहंकारिकत्वसामान्येन प्रत्ययात्मनः शक्तिरूपत्वेन चे
ति सर्वात्मना परोतानीति कथमध्यवसायात्मतेषां सत्यम
मीभिः प्रकारैरेवमेव किन्तु स्वविषयाकारैः परिणतानि स
न्ति बुद्धावनुप्रविष्टानि तदाकारतां बुद्धावदयंति तेन विष
याकारतापरिणामेनाध्यवसायमयानि भवन्ति ननु स्वाल

तरणपादिना रूपत्रयेण सर्वं चैषां लोकयात्रोपयोगी ननु तत्
नन्तु चालोचनमेवेयति मूलमिति तेन कस्मान्न व्यपदेशः अ
त्राह आलोचनमात्रेणेति बुद्ध्यध्यवसायपर्यन्ततामागच्छ
ताते न तु होममायमर्थ इति न प्रमातृविश्रान्तिस्तस्यां तु सं-
तां भाभवतीत्येतत्त्वद्रूपदर्शनयोरपि संमतमित्याह अध्य
वसायो हीति अन्यत्रापीति च परैरपि च शुक्रमेतद्रूपगतमि
ति वदन्त्व दर्शनस्य सर्वसंमततया इष्टिमानमाह इन्द्रिय
वृत्तेरित्यादिना मायापदपवचालोचने हारं हारी एयन्तःकर
णनीत्यादिका प्रक्रिया न तु विद्यापदे इति दर्शयति यत्तु तै
अनुगम्यत इति अस्माभिरपि न नांगीक्रियत इति यावत्
सोत्स्यादिक्रम इति घ्राणेन्द्रियस्य स्थूलं यावत्परमसूक्ष्मं श्रवण
मिति एवं परमसूक्ष्मं वागिन्द्रियं विषयाणां शब्दादीनां यथा
योगं स्वरूपं निर्वर्तयति घटादिकरणावसरे त्वागोगोग्रहण
हयमिति बहिः पायुपाणिपादस्य अन्तर्वागिन्द्रियस्य तत्त्व
तो भविश्रान्तिरूपस्य सेति असाधारणक्रियाणि सक-
लशरीरव्यापीनि केवलं नियताधिष्ठानस्य स्वस्वहृत्तिका
नि कर्मेन्द्रियाणि तेन कुणपाणिरपि दोर्भामादनइसा
दिसिद्धे पषामिति निर्धारणे केचिदित्याङः अपरे त्विति
शेषाणि इति पठ्यन्ते तत्तावदेकरसमेव अन्तःकरणस्या
पित्त परसंहारहारविभावे नियतः क्रमः यथैव कालक
लःकरणं यतो वा वेदनकरणे ततोऽत्र रागश्च आदेः प्रमात
देशकालादिभेदने क्रमस्य विचित्रत्वात् ॥

ननुसर्वाणिकरणानिमायाकृतभेदानुसारेणबहिरितिपु
रुक्तं मायाप्रमातृप्रयोगादन्तरंगत्वेनवान्तरितीदंबोधमा
र्गोक्तं अन्तर्बहिष्करणताविभागंघटयितुंबुद्धिकर्मेन्द्रिय
णोऽक्रमपिस्वरूपंप्रस्तावयति पञ्चेति सर्वसिद्धेष्वि
त्यर्थः प्रमाचक्षुरित्यादिसमासपदं मनसिग्राहकेत्याद्य·
हकावेनत्रिष्टुम्यादिबुद्धौसर्वत्रादिचितयेष्वन्तःकरणतां
याहेतत्त्वेनयोऽयं अन्यइतिविश्वावासिप्रभृतयः तेषाहंका
रबुद्ध्योः कारणस्कंधतामेवाहुः नकरणस्कन्धतां स्वदर्श
नस्पृष्टतामाह इदन्तुहितेनोक्तं अन्तःकरणाभिन्नहति
वशाद्योजनायतास्त्रियेव अन्यथाह्येकमेवतत्त्वमित्युक्तम्
अतएवोक्तमागमे मनोगर्वस्तथाबुद्धिर्हरमेतत्सदात्म
नः भूतेयभूतनाथेननिर्मितंकरणत्रयेति ज्ञानक्रिये
ति ज्ञानशक्तिरेव मायाप्रमातरिभिन्नवेद्यविषयत्वेनसत्त्वं
एवंक्रियाशक्तिःभिन्नकार्यविषयत्वेनरजः मायैवभिन्नव
स्तुविमोहमयीतमइतिवक्ष्यते स्वांगरूपेषुभावेषुपत्युः
ज्ञानमितिसूत्रे अतस्तासांयोभेदोल्लासोविभिन्नवेद्यकार्य
विज्ञानविस्फारविषयः सापराप्रकृतिर्मूलकारणं अथा
नत्वं प्रथमतोधीयतेविश्वंसृष्टौयत्रचप्रलीनंसत्प्रलयेन
न्विस्तादिनाविभागरूपतोव्याचष्टे सर्वतत्त्वानामादिभूतान
एवपराप्रकृतिर्यासा प्रधानतत्त्वमितिसंबंधः अविभागा
स्वतोस्पष्टयति सकलभेदानभिन्नव्यक्तिरविभागरूपतेति
नतुसात्वंज्ञप्रसङ्गप्रतिषेधमात्रमित्याह मूलकारणरूपे
वस्तुनीति तेनतद्वस्तुस्वभावभूतं तदविभागात्मकत्वं एके
त्वं व्याचष्टे एकत्वंचास्याः सर्वत्र अतएवसकलभेदानामा

ई
प्र वि
५१८
510

श्वविभागः सा ततश्च कथमसावन्यान्यरूपा भवेत् एकत्वै
व समस्तभेदस्यास्वीकारात् ननु प्रधानं सत्त्वाद्यविभागरूपं
सत्त्वादीनां च भवता शक्तित्वेन सहिष्यते भेदास्थितेः शक्ति
मत इति स्वार्थनिर्णये पतंजलिप्रभृतयस्तत्र शक्तित्वे
नव्यपदेशं कुर्वन्ति तत्कस्मान्नतभेद इतीह शिवबोधे प्रति
समाधत्ते सत्त्वरजस्तमोरूपत्वेपीति भेदास्थित्यभिप्राये
णास्माभिः शक्तिता निषिद्धा न तु वास्तवेन रूपेण यदुच्य
ते पत्युर्ज्ञानं क्रिया च या मायास्तृतीये इत्यादि तत्त्वारूपे
मायाशक्तिव्यपदेशो युक्त एव पातञ्जलादेरिह दर्शितो
ऽनेकात्मतैवेति हि सत्त्वं प्रधानशक्तिः पुरुषस्येत्यादि विभा
ष्य एकत्वे प्रकारान्तरमाह परमेश्वरेत्यादि तेन मूलसू
त्रकवादीनामङ्गीकृतमेवेह इह हि शैवे मायातत्त्वमुपाद
नकारणं निर्दिष्टं तदेव परप्रकृतिरूपेणोक्तं मायान्तु प
रमेश्वरशक्तिरुक्ता तत एव पार्थिवाण्डानामिव प्राकृता
ण्डानां यदसंख्यत्वमुक्तं पृथग्हृदयमसंख्यातमिति तदत्र
ण तत्त्वे वैचित्र्यभेदो जीवितं मायातत्त्वं शक्तिश्चेति त्वेकमे
वेति न तत्राण्डविभागश्चागमे प्रदर्शितः तदुक्तं पृथग्हृद
यमसंख्यातमेकमेकं पृथग्घृदयमिति अत्र च प्रतिपुंस्तत्त्वे
न भेदोस्तीत्यभिदधता तदधरवर्तिनां तत्त्वानां भेदोस्तीति
सूचितं नन्वत्र किं प्रमाणमित्याह एष चेति एष तत्त्वक्रमो
ऽनुमानेनापि प्रत्यक्षपूर्वकेणान्वयव्यतिरेकिणा व्यतिरेकि
णा वा साधयितुं शक्यते नत्वनुमानेन प्रतिबन्धोऽवधारयितुं श
क्यः किंतु परमेश्वरनियतिशक्त्युपजीवितास्त्ववधारयितुं श
क्यो मातरिं ता दर्शीकृतो तादृशा उच्यते परमेश्वरशास्त्र.

प्रामाण्येनोपपादितः संपादितो नियतिशक्तिव्यापारप्रति
विषयभावो यस्य तत्त्वक्रमस्य स तथाभूतः एतदुक्तं भव-
ति परमेश्वरस्य तावदागमस्याखंडितप्रामाण्यमुपपा
दितपूर्वं स च नियतिमेवंभूतां दर्शयति यदुत स्थूलम
वश्यं स्थूलपूर्वकं क्रियाकरणपूर्विका प्रविभागपूर्वको
विभाग इति तत्र प्रतिवेधात्सिद्धादवगम्यते पारमेश्वरा
गमद्वारेण प्राभासितस्य तथैव वस्तुत्वेन तथा स्मरणादीना
दिफलानामाभासनमेव सिद्धः ननूच्यतां न हि परमेश्वरा
गमोक्तो विलक्षणाशंक्याह इहेति अस्माभिस्त्वागमप्र
स्थनिष्ठे वार्तिकभाष्ये वृत्तिग्रन्थे श्रीतंत्रालोकादौ प्रपं-
चोन्मेषेण दर्शितः इयन्ति हि तत्त्वानि यत्राद्याभासा एव
भिन्नीभूय घटादिस्वलक्षणीभूताः कर्मेन्द्रियैर्जनितास्त्रा
पसर्पिताश्च बहिरिन्द्रियैरालोचिता अन्तःकरणेन संक
ल्पनाभिमनननिश्चयनपर्यंतं नीता अशुद्धविद्यया विवे
चिताः कलादिभिः प्रमातारमुपदर्शयद्भिरनुरञ्जिता मा
याप्रमातरि विश्रांतिद्वारेण भिन्ना अपि सन्तो यद्यप्यर्थं
स्थितिरिति न्यायेन सत्यप्रमातर्येव भेदविगलनतारतम्ये
नविगलितस्वकभेदाः प्रकाशविमर्शपरमार्थतयैव
विश्राम्यन्तीति शिवं ॥५२॥
इति श्रीमहामाहेश्वरश्रीमदाचार्याभिनवगुप्तविरचि-
तायामीश्वरप्रत्यभिज्ञाविवृतिविमर्शिन्यामागमाधिका
रे तत्त्वविमर्शः प्रथमः ॥
आदितः विमर्शाः ॥१२॥

६
प्र वि
५११
511

ॐ श्रीगणेशाय नमः ॐ ॐ अथ प्रमाधिव्याधिभुपाशात्रयशा
तनं त्रिशूलकरं वन्देहममृतमूर्तिं हर्षणिकशक्तिपरमा-
र्थं ॥ एवं प्रमेयतया तत्त्वराशौ निर्णीते तदनन्तरं प्रमातृ-
तत्त्वं निर्णीतमपीह स्वात्मनीश्वरतामस्य अभिज्ञापनप्रकृत
प्रमेयसारेणास्य प्राधान्येन वितत्य निर्णयार्हमिति तद
र्थं विमर्शान्तरं तत्रैतन्मातृतेत्यादिना व्याख्यानो विश्वात्मकः
परश्च यन्नेतन्श्लोकविंशकेनारभ्यते तत्र श्लोकेन ब्रह्मा
दिप्रयस्वरूपं ततो हेयेन हेयोपादेयप्रमातृरूपविभागः
ततस्तदुपयोगितया मलस्वरूपं तत्कृतं च प्रमातृवैचि
त्र्यं सप्तभिः इयता हेयरूपे प्रमातृरूके तदुपादेयरूपाभि
धानाय समावेशस्वरूपं द्वाभ्यां ततः प्रसंगात्प्रमातृरव
स्थानां स्वप्नमादीनां स्वरूपं पंचभिः तासामेव हेयोपा
देयताविभागस्त्रिभिरिति प्रकरणतात्पर्यं ग्रंथप्रत्य
केक्षरार्थो निरूप्यते तत्रैतन्मातृतेति तत्रैत्यवं भूते सि
द्धागमसिद्धे संवेदनप्रकाशपक्षे हि ते मातृमेयात्मनि तत्त्व
वर्गे निर्णीयमाने प्रस्तुते घटे तत्कालादिकंचुकपरिवे
ष्टितं तदेव यत्संख्यत्रयस्वरूपसंहृतप्रमेयतया प्रमेयान्तः प्र
ख्यं भवति दशायां तस्याः अधिष्ठातातदभिसंपादनद्वारे
ण स्वोपासकवर्गस्य तद्दशादानेन तदेवस्याध्यानसमा
पन्नस्य स्वाभिमुख्यसंपादनेन च भगवान्परमशिव एवे
श्वरतां भजमानः सकृद्भुत्वेनाधिष्ठाता तत एवासौ मायापदेऽपि
प्राणापानात्मकधर्माधर्मसूर्येन्दुदिननिशा
रिविभागविरहितत्तद्विभागविवेचनभूतनिशामस्तकस्तनका
प्रमातृभागाधिकस्वरूपसंस्पर्शात्तुन्मीलितमध्यमसत्यातीतरूप
भिन्नस्य तत्प्रमेयस्य प्रमेयस्य प्रमतरेसंपादनेनाधिष्ठाना ग्रः
संपादनेनाधिष्ठानाप्रलाप्र
स्तेन

तस्मिंस्तस्मिन्तानवबहूरणलक्षणे प्रसरेधिष्ठाताविभुः प्रत
यवैतौ प्रमेयमेवेदमिति प्रकाशात्मना प्रधानीकुर्वाणो ग्रह
मिति प्रमातृतासारस्वरूपंन्यक्कुर्वाणो नतत्तीयनयनुया
गिनौ देवतेवदेवतम् अधिष्ठातृरूपंदैवतमधिदैवतमिति
तत्वार्थः तमवतारयति विश्वेश्वरस्येत्यादिना विश्वेश्वरस्ये
त्यादिना विश्वेश्वरस्यब्रह्मादिरूपैरधिष्ठातृत्वेनैवस्वरूपेणाता
निकयत्रुन्मीलन्ति आहतुहिगुणत्वेन ननुसृष्टसंविन्मा
त्ररूपतयातपवाधारत्वेनस्थितं यदैश्वर्यैकतत्वालक्षण
स्वातंत्र्यंक्रियाशक्तिपर्यंतज्ञानं तत्रैयांरूप तर्हिद्विरूकृत
इत्याह सत्वेति यपवर्गाभिभूतो गुणस्तद्विषयमेवतदैश्वर्यं
तानत्रूपमितिभेदः सूक्ष्मेपुर्यष्टकात्मतानथस्थूलदेह प
ववेति वृत्तिंव्याचष्टाणोमात्रपदंसौत्रंव्याकरोति यथयी
मीत्यादिना मूर्त्याकारेण कालविशेषणाच्छरीरिव
त्रियतेनपारिमित्यभाजायोवच्छेदस्तद्रहितः सामान्यकाल
योगस्तु तस्याप्यस्त्येव यदिवामूर्तिनयः कालभेदोनियत
कालः पुर्यष्टकस्यदेहतास्त्येव महाभूतैः समनवयादिति
तदपीहनवचनीयमिति मोहव्यपोहनायशंकोद्भावनार्थं
देहग्रहणं उपादानादेतामिधानायात्यन्तस्थूलग्रहणं
नस्थूलदेहस्याप्युपचरितंतत्त्वमस्तीत्याह ननुसूक्ष्मत
मोगुणात्मकमिति प्रधानतत्त्वमेव तत्रकिमनेनभाषा
त्वेण आह सत्वादीति प्रधानेनत्वभवति ननुतदेवत
दितियावत् तथाप्रतीतेरिति अहमिति प्रमातृताप्यारि
येण एतदेव परिघटयति आशंकामपनयन्यथापिचेत्स
दिना एवमिति युक्तमुक्तं यदुक्तं तत्रस्माद्धेतोः यद्यपित

प्र
वि वि
५१२
512

स्वतंत्रत्वात्तच्छरीरयोस्तथापि न मातापितृजनकस्य
त्वं तत्त्वतेति संबंधः उदभेदेनैवेति पुर्यष्टकाभेदेन पूर्वं सं
वेद्यपावेशेनाभ्युपगतत्वात्तस्य तथाभाव इत्युक्तं ननु रूपादिभिः
यत्नवत्पुर्यष्टकेप्यस्यैवेत्याशंक्याह प्रमेयानवभासाच्चेति
यदि तत्रत्यरूपादि प्रतिभासते तत्संकोचोपहितं हि संवेद
नमेव तत्प्रमातृभावेन निर्भाति न तद्गतप्रमेयभूतं रूपा
दि शरीरेतत्तदेव प्रमात्रीक्रियमाणं गौरोहमिति प्रतीतेः
ननु पुर्यष्टकशून्ययोरपि सर्वज्ञानामस्त्यवभासमानतया प्रमे
यत्वमस्त्येवेति पुनरपि कथं तयोः प्रमातृमात्रतेत्याशंक्य
पृतान्तरेणोपक्रमते प्रथ्यवेति तयोरन्त्यप्रमेयताना
भ्यावत्यप्रमीयते घटादिवाह्यशरीरेण संपर्के भोगसं
पादकत्वायोगात् अतएवेति यतोन्यत्रप्रमीयते ताभ्यां
ततः परमेश्वरस्येति स एव हि स्वातंत्र्यात्तथाभातीत्यभिः
तमस्मत्कृतं रूपभक्तरूपेति सर्वेषामाच आणवसंज्ञो यात्ता
नाम्मामायाकृतएव मलविशेषः यदुक्तं ते मायाशक्त्यैव
तत्त्रयमिति नस्यातिस्फुटेन संवेदनभागेऽज्ञवेन्नुद्देतमा
गुणाद्वेदेचयति भिन्नाभासयोगं स्फुरति भगवान्रुद्रः प्र
धिष्ठातृतामेव सपुष्यति तस्यैत्यादिना अत्र चेति सर्वसं
हात्मनि प्रमातृमात्र एवेति भगवान्रुद्रः नत्र समस्त
वेद्यतत्पक्षेहृत्तस्य देवपरममपदमिति काव्यत्वात्तद्यर्दशा
रेवेदकतत्वस्य सर्वोत्तीर्णं सर्वमयसर्वेश्वरत्वादिधर्मभाजन
स्माधापिवेघपवस्तून्यादौ समुपहितसंविसंकोचयोगात्स
रमार्थप्रकाशोनास्तीति तत्प्रकाशसारायास्तुर्यदशायाः
तमेववैलक्षण्यम् ॥

ननु भावनापुर्यष्टकभावे शून्यस्य भावापत्तुर्भावाइवन्तु
शून्येत्र भावे को ऽसौ भेदः भावनाप्रधानो भावयितान्याभवेत्तत्
विद्रूपापेतया च न भावस्य भेदोस्ति अत्रोच्यते शून्ये चेति स
मकालमेव यदा शिवस्य संवेदनदिशो भयमपि वायद्र
रागच्छरीवद्यदास पि वाव्यतिरिक्तं भावयति तदा तन्मध्या
त्रप्रविष्टभावनीयशून्यान्तरापेतया यच्छून्यान्तरमित्युक्ते
तदेव प्रमातृतामेति न चानवस्था संवित्तावेशेनैव य
यप्ययं स्थितिरपि त्वात्मबलस्पर्शादिति च नीता प्रमातृ
तो ऽहमात् तदाह समर्पितमिति एवं सूत्रार्थं व्याख्याय
शेषं व्याचष्टे जागरेत्यादिनार्थं सूचये य एवमर्थः प्रसरश
हृः सत्राभावपदेन हृतो विहृत इति संगतिः सामेत्यनदे
वताहयं व्याख्याय विभागेन स्फुटयति जागरेवेत्यादिना
हृदयाप्यायनतादेव कमलासनः पलायतीति व्याचष्टे न
केवलं नैवं प्रथमतरणे स भावावभासोस्तीत्येतावत् अ
पितु स्वस्थावस्थामपि स्वप्नावस्थामपि प्रतिपद्यते इत्येवंभू
तमनुवर्तने ऽर्वाणः पालक उच्यते भगवान्विसर्गमध्य·
मावैरवयीत्मकानुवर्तनोल्लासपदे परमेश्वरात्मभूतिपञ्च
प्रमातृपर्यन्तप्रमातृवर्गे करणभूमौ वर्तमानः हृदये हि प्र
घमपयपन्नौ प्रसरणात्मनि प्रतिभात्रूपत्वेन प्राथमिककलिको
स्फुटिः यथेच्छाभ्यर्थितो यातानायतो ऽस्यानिनिस्थित्या
रूढावस्थातस्समस्तवादोपसंहाररूपान्नाहत परवाऊत्वा
नुप्रवेशं प्रावस्थातु विना तालुनि सर्वोपसंहारात्मकस्य भ्रम·
ललतणोपि कण्ठदेशोपि निःसृपिते महूर्ध्वपदगामित्वादेव ल
भ्रान्त इति तालुनि इति नोक्तं विहृतिकला तत एव प्रसरहृदः·

दयो विसुकंठे रुद्रतालुरीश्वरभ्रूमः सदाशिवोर्ध्वब्रह्मरं
ध्रोनाश्रितात्मकशक्तिसोपानोपरिपदः कारणषट्कवि
ग्रहः परमेश्वर इति हृदयादिस्वरूपाभिधानेन सूचितश्चागा
कोर्थः प्रविभक्तात्मनात्मानं सृष्टा भावान्पृथग्विधान् स
र्वेश्वरः सर्वमयः स्वप्ने भोक्ता प्रवर्तत इत्याशयेनाशंकते य
द्यपीति यदेति यतः तदेति ततः यदिवा यदा संस्कारवतः
स्वप्नस्तदा स्थितिरूपतास्तां तेषां तु स्वप्ने जागद्रूपतेव सा
तथा स्वप्नेप्यभीष्टार्थान्तराणां यस्यानतिक्रमादितिनीत्याइ
ति यदा तदाप्याशुक्तं अभिनवं तावदर्थावभासनेस्य पति
ग्रम्भकारादिभिर्देहकुम्भादीनामवभासने स्फुरत्येव त
सामान्यात्मनस्तस्यैव दर्शनमित्येवं भूतविशेषानपेक्षा·
जागर्यायामपि सृष्टिरूपता नत्वेवं स्वप्नेप्यस्ति इति पक्षान्तरेण
परिहरति यदिवेति प्रभेदबुद्धेः सर्वेवयमेकं विप्र इत्यस्या
भेदबुद्धेर्वा पूर्वं सृष्टेवेलं तत एव प्रतीतेरास्पदं पूर्वं प्रमातुः·
नैरैकेनासावबभातः तथारूपतेति सृष्टिरूपता जाग्र
दवस्थाया इति पूर्वेण सम्बन्धः बुद्धिगुणएवेति एवका
रेण शुद्धस्य यौ समारोपितयोर्नास्ति तइ भट्टारकस्य तच्छु
द्धमैश्वर्यज्ञाने च स्पृशत एव बुद्धिगुणाभ्यामैश्वर्यज्ञाना·
भ्यायोग इति दर्शयति तदेतत्स्फुटेनागामिकेनाभिज्ञानेन
दर्शयति अत एवेति प्रपञ्चविगलने यदीशानमैश्वर्यं तत
किल बुद्धिगुणस्य सर्वस्य प्रत्यस्तमयः सत एवान्यकारण
णानामभावस्तस्मिन्नस्तीति तदा तस्मिन्महाव्याप्ति इति वे
धाममध्ये महाव्योमन्येकघनतासमापत्त्यभावेपि बुद्ध्य
वेशमात्रमस्तीति तन्नीयेनेनत्रेणोदानमहातेजः प्रबोधा
इदं दहनात्मना याणः ॥५३॥

अस्यैवमात्मतामात्रस्य विभागं निरूपयन्कालादितत्त्वान्त
र्योगेणैवास्योपगम्य इति सूत्रेण निरूपयति एवमात्मते
मायया विमोहितो न एव कर्मणा बन्धकत्वेनाभिमन्यमान
एष इति कालकालादिवेष्टितः पुर्यष्टकसंज्ञावितसं
विस्वभावः संसरणशीलः विषयात्स्वरूपप्रकाशनश
क्त्याप्रत्यभिज्ञापितमैश्वर्यं विशुद्धं स्वातन्त्र्यं यस्मात्तएववि
घस्यचनानि विज्ञाय चिद्रूपानुप्रवेशशंकाशून्या सन्त
न्मबंधविरहात्तस्यापि देहे मुक्तः पतितत्वेस्मिंशिव एव
कोमुक्तः भूतपूर्वगत्या तु मुक्तशिव इति व्यवहारश्चागमे
ष्विति सूत्रार्थः नसंक्षिप्याह इदानीमिति ननु इति अ
मयाहि संविद्रूपत्वेन स्वयमस्तुतशक्तिर्माया न तु तदधीनो
मोयेन तस्याः स इत्युच्यतेति भावः वस्तुत इति देवादीनां
चेत्युपक्रम्य तत्रापि कार्ममेवैकमिति सूत्रेस एव चेति
यस्यैव बन्धस्तस्यैव मुक्तत्वमुचितमिति यावत् आदिग्रहणा
ज्ञानचर्याभस्मादयः यथोक्तं श्रीसर्ववीरमते कदाचिद्र
क्रियोगेन कर्मणादी तयापि वा संसारिणोनुग्रहणातिर
ति श्रीमतंगेपि मोतेवाप्यचतुष्टयात् नन्वात्मत्वंप्र
स्मृतं हेयमागमेप्युक्तं तेनात्मोपासकाः शैवे न गच्छन्ति प
रंपदमिति शक्तिशिवात्मताया उपादेयत्वेनोक्तत्वादिते
शक्तिस्त्वाह आत्मन इति षष्ठीसमासोयं हन्ताविल्यर्थः पे
सर्वग्राह इति सोर्थः ननु चिद्रूपत्वं कथमनेन विहितं भव
तीत्याशंक्याह चिन्मात्रेत्यादि सदेति बन्धापेक्षा च मुक्तते
त्मात्मनशेषः १५४ अस्यैवमाहरागमिकं संज्ञाभेदं
निर्वचनतो निरूपयति स्वांगरूपेष्विति योग्यासूकउ

प्र
भि वि
५१८
514

क्तः स्वभावान्संगवत्स्वभिमीते इति तेषां स्वामी परमा-
र्थरूपापेक्षणास्त्रपालयिता तदयमीश्वररूपता समाविष्ट
इतीश्वरवृदेवपतिरुक्तः शास्त्रे यदानुमायाशक्त्याकृत
भेदांस्तान्मिमीते तत एव क्लेशैरविद्यादिभिः कर्मभिः शु
भाशुभैरादिपदाद्वासनाभिः कर्मविपाकरूपैश्च भोगै
रुक्तैकंचुकरूपैर्विनैः कलुषीपरहस्तितेकरसस्वातंत्र्य
स्तदानेदैव पाशैः पाशिततयात्मपशुरुक्तः तदेति शिव
तायाः पाल्यमपेक्षणीयं यन्मतित्वेन नास्तित्यतिरिक्त
मित्यर्थः ननु मायातो भेदेष्विति सोऽत्र न स्पष्ट इत्याव-
यदेवतदुक्तं पुंस्त्वावस्थायामिति सोऽत्र मेवत्य मुक्तमि
ति दर्शयति तदा चेत्यादिना पुंस्त्वावस्थायैवेत्येतेन
अथ किमनया भणितिभंग्येति चेत् आह प्राधा
निकेति पुंस्त्वावस्थायैवेति कापिलवत् तेन तथैव
कथान्यदुपगम्यम् प्रधानादागतेनच भवेविश्वमित्येवं
तावत्सारमेश्वरदर्शने परमेश्वरशक्तैरेव तत्पाभावोप
गमादुपगतं यान्यपि दर्शनान्तराणि कापिलवैष्णवा
दीनि तैरनन्तरारूढमपि वलादभ्युपगन्तव्यम् सदुक्तं राग
कलाविद्यानियतिकालाद्याधिकं ईश्वरादीश्वरेति यदु
क्तं तदेव स्पष्टयति अविद्येत्यादिना तत्वनीश्वरास्त्वी
श्वरविपरीतः पुंसास्तु तथाकृतः आह स एव च पुमानि
ति ननु च क्लेशाकर्मविद्या कारायैः पुंसोऽस्तु भवान् तत्र क्ले
सामर्थ्ये अविद्यामोहनीत्वेन वेदननिषेधरूपतयात्मानं वि
श्वमात्मत्वेनानीतयश्चैमायाश्रितपापानात्मानमात्मतये
दयंतीकामंस्त्रीहृता रागादिश्चयेण च रागः नियमादयस्त्व
कंचुकस्वरूपाः आह।

नियत्येति नियतिर्यतः कर्मणो मूलभूमिः कार्यका
रणभावो हि ततः उन्मूले च कर्मवासविपाकत्रयं ततस्त
यापि युक्तः रागेणचोपलक्षिते विद्याकले यदेव हि रा
गास्यं तदेव कला विद्ययो विषयः विपर्ययो वा तत
स्ता भ्यां युक्तः कर्म च क्रियारूपं क्रियाचक्रमलत्तणकालानु
प्राणितेति कर्मणां गीकृते न कालोप्यंगीकृत इति तेनापि
युक्त इति तेषां रसनानारूढमप्यस्ति हृदये तद्दर्शयति प्रव
चनमिति अस्माभिस्तु परमेश्वरदर्शनानुगृहीतैः स्पष्टमेव
सर्वं निरूपितं प्रमातृहिंस्रहाणुहृत्स्वरूपावितस्तवकव्यवस्था
र्थे विद्यास्वरूपेवार्थस्य मुख्येन विस्तारणाहत्वात् १५५
पशुस्वरूपं वितस्य निरूपयितुं तत्र शान्तवमिति संगतिटीका
कारः स्वयमेव करोति पशोरिति पारमेश्वरेति अन्येतु स
र्वगेतद्रूपविदस्तत एतेषां न सम्यक्तु क्तिविति शिति वा तु
स्वप्रक्रियायां तावदारोपणे परमार्थतस्त्विदमेव मुक्तिकार
णमंगीकृतं चेत्तत्स्फुटित्याशयः तत एव रागमः तेप्यात्मो
पासकाः शैवेन गच्छन्ति परं पदमिति सप्तमीत्तत्तीयाभ्यामा
ख्यातः विभक्तमिति लक्षणतो विषयत्वस्य प्रकटयिष्यते ने
न प्रकारेण मलत्रयं तत्र प्रथमतआणवमाह स्वरेण स्वात
न्त्र्येति स्वतेजोवबोधइत्येतत्वे तत्रभागान्तरहासास्वरूपापहा
नात्मलमणुता संकोचमादधानमाणवं द्विधा ननु स्फटिको म
लेव्याख्यियेनिर्मलस्वरूपाभिधानं किमेतत् एतदित्याह ॥
शुद्धस्वभावस्येति मलेह्यन्येन विजातीयेन योगः कज्जलो
णः स्वथापाः उदंशोपिकज्जलस्येति एकजातीयमेकत्वनंरू
पति र्मलं विशुद्धं तत्सर्वं वाच्यमित्यर्थः सामान्येनेति अनव

प्र
वि वि
५१४
515

भानरूपतैव स्वतन्त्रत्वादिधर्मग्रामस्यापीत्यर्थः द्वितीयत्र
ग्रहणेन तच्छक्तिरूपतैव मायाप्रधानादेरित्याह शुद्धगिति
यथाक्रमं मंत्रेशरूपतया ये भाविनो विज्ञानाकलास्त एव
उदिताः मन्त्रेशास्तत्स्वतन्त्रा एवदर्शनादिति आगमादि
प्रमाणकादिति भावः ननु विज्ञानाकलादेरहन्तात्मकः
चमत्कारलक्षणकर्तृतारूपस्वातन्त्र्यवियोगिनोपि बोधः
मात्रं तावद्रूपमिति पञ्चलक्षणो यदस्तत्वमुक्तं पञ्चनिर्मो
ग्रमूर्तीत्रंशति तत्रास्तीति कथमणुत्वमाणवमलप्रयुक्ते
च तदेव च प्रभावीत्याशंक्याह स्वातंत्र्येत्यादि तत्त्वं हि तत्र
व्यतिरिक्तवेदकात्मकं निषिद्धं यत्कला विद्यारूपतत्त्वान्तर
प्रसादात्मकलस्योदितमुच्यते तच्च विज्ञानाकलस्य नैवा
स्ति स्वात्मन्यपि वेदकत्वं पृथग्भूततया नोपपद्यते अपृ
थग्भावेन भवदपि अहमिति चमत्कारात्मनो विमर्शस्य
तिरोधानादस्मत्तो न विशिष्यते तदेतदाह स्वात्मनीति
बोधकत्वं भिन्नं बोध्यमपेक्ष्य न स्वात्मनि भिन्नं च बोध्यमस्य
नोपपद्यते न सम्भवतीति तेनात्रैव न तत्त्वमिति संगतिः
तदेवेति उक्तं वस्तु यदाणवत्वे प्रयोजकं स्वं वैचारणववाचो
युक्त्यांगीकृतं तत्कृत्स्नमात्रपदेन स्फुटीकृतं ननु व्यतिरिक्ते
वेद्यवेदकताकामं मात्रपदेन निराकृता अव्यतिरिक्तेत्व
साकेन निराकृता इत्यवस्यैवतिशांकितमाह मात्रग्रहणे
नहि विद्यात्मतां नैव च प्रणानिरस्यता भिन्नवेद्यवेदकत्व
निरसितुं शक्यं तस्य हि सा पूर्वभाविनी निर्विकल्पदशा य
स्यामेवाभावस्तुक्तं प्राक् अथ स्वातंत्र्यस्यापि बोधतेत्यंश
विहरणोति बोधनिराकृतस्यत्वितिष्ठितेवेति प्रज्ञातत्वं.

नयघसाध्यमित्यगउलतरांस्फुटमेवास्ति सूक्ष्मादेर्हि वेद्यवे
नस्फुरति उपाधिभावात्संविदंशोपि वेद्यछायाकलुषितप
व द्विविधफलमिति विज्ञानाकलादयो देवादयश्च फलम
स्येति कर्मणा बध्यन्ते मूलमलतावाप्यकर्मग्राहकस्यभा
धान्यान्नज्ञानस्यैतदधीनत्वात् सृष्टियोगेतु मायाख्यस्य
लत्वमुक्तमित्यविरोधः ननुबोधमात्रस्य स्वातन्त्र्यमात्रस्य
वयविर्मोगमुक्तं तेनानित्यत्वमापतितमिति पमुलत्वे
यन्नित्यत्वं मूर्धाभिषिक्तमुक्तं तन्यक्तं स्यात् नेति दर्शयति वो
धोमात्रं चेत्यादिनानित्यएवमावित्यत्तेन स्वतंत्रबोधस्येति
स्वातंत्र्यांशेन बोधरूपस्य ननु संवेदनांशेन ज्ञेयत्वस्यासंवे
रूपत्वेदनात्मनो न परस्तनात् नकाचिदिति अनारोपित
स्वातंत्र्येपि घटादौ चिद्रूपतासन्निहितात्मकाशैकसारवा
त्साकथमारोपितस्वातंत्र्येण भविष्यति तदाह विशेष
णोति नन्वेवं घटेपि यदि चिद्रूपताकश्चित्समयेपन्नहि किमभा
न्नएवासौ ऽभित्याह जडस्यतु इति युक्त एवेति उचितएवे
त्यर्थः ग्राह्यग्राहकद्विविधारूपयाह्ययं समयागीति जडरूपताम
क्तियया चिद्रूपतायाथात्म्येनावेशः आसमन्तात्स्वरूपश्चे
घाइत्यर्थः यदाह स्वेरणात्मरूपादिति उक्तमनेन चिद्रूपताया
प्रकारः अष्टमूर्तेः किमेकस्याभित्यत्रतु स एवतोषः नन्व
तान्मनि जडआत्मत्वेनाभिमननं विपर्ययाख्यातिरूपयम
विधेति सांख्ययोगादीनां मतमनित्याशुचिदुःखानामा
त्मास्थित्यादिवचनात् तत्कथमुक्तं युक्त एवासाविस्माशंका
ह पुरुषएवेति यतएवमुक्तं ततः सांख्यीयमप्युक्तमेववो
द्धव्यमित्यर्थः प्रकृतिपुरुषाविवेको हि प्रकृतावेवपुरुषा

भिमानः संमतः नत्वभावमात्रे मोक्षावस्थायामपि तद्भावने
संस्वरणप्रसंगात् एतदेव न्यायेन घटयति नहीति अना
त्मनि यदि न संनिहितः स्यादात्मा तत्र तदभिमननं मिथ्या
ज्ञानं भवेत् ननु देहे सन्निहितमाकाशमध्यवस्यन्भ्रान्तो भ
वति ननु सांख्यैर्नैदमुक्तमित्याह अथेति एतद्विषयस्या
त्मानात्मलक्षणस्य प्रकाशने तत्त्वनत्वैर्वं न्यत्वेनोक्तमपि
तनात्मैवात्मतया भातीति एतदपि दूषयति केयमिति
प्रकाशप्रतिभासनं यदि तदा तर्हि तथैव तद्वास्त्विति नाप
रमस्य तत्त्वमिति का भ्रान्तता अथ तथा प्रकाशनाभावे
पि तथाध्यवसाय इति भ्रान्तता एतदपि दूषयत्यात्रिपत्र
विति ग्राम इति उचितः पुरुषसंवेधीति पुरुषविषय
तयोचितः पुरुषसंवेधीति पुरुषविषयतयोचितः तत्र
तिसंदेहो किं स्पष्टयति आत्मनीत्यादिना अयुक्त इत्यने
न प्रकारप्रश्नेऽपमङ्गत्वैवैकवाक्यत्वेनन्वेयन युक्त इति त
दिति चनिपातोऽत्र एतेवत्वव्यापदेशद्योतकः अहमित्य
वसायः सांख्यदृशि प्रसक्तानात्मन्येव बुद्ध्यहंकारमेय
मप्युचितः नत्वन्निचिन्मात्रस्वभाव एवं त्वेन तदिति परमे
श्वरेण हि सांख्यानां तावदेवोपदिष्टमपूर्णं इदं त्वपूर्णं
ज्ञानमिति भावः स्वक इत्यस्य हृत्रिभः तत एवोचितः नन्वे
ति वाक्यार्थरूपे तैरिति सांख्यैः यत्स्वमेयप्रसंगेनेदमाया
तेन देवोपसंहारेण निवारयति अस्माकं विति एवमित्य
हे मत्यवमर्शोऽय इत्यादिप्रदेशेषु एतोऽहमिति विमर्शोमयत
मात्मन उपपादितं तदेव कर्तृत्वमुक्तं विमर्श एवासावित्यादिप्रदे
शेषु ततः कर्तृत्वव्यतिरिक्ते कार्येनोपपद्यते तादृशस्य कार्यं
कारणभावस्य वितत्य दर्शितत्वात् एवं च कार्यरूपं जगत्स्वरूप
मयमेव युक्तिः ॥

पुरुषएवेदं सर्वमिति जगतीतिसमयइतिचवदन्नेककपव
देहादौघटादिवैलक्षण्येन तथाभिमानोविश्वरूपएवेतिदर्श
यति ततएवहितत्रतत्रोक्तं द्विगुणोयंविश्वइति तथेतिजग
ति प्रसृतेति निपातसमुदायः परस्माच्चैवपरीत्येनाप्युक्तो
भिनिवेशोयमिति द्योतयति मूलंवंयइति सतितस्मिंस्त
एवानात्मीकृताहन्तादेकदेशेशरीरादावनात्मन्येवानपह
स्तितत्त्वेयभावेहमित्यात्माभिमानरूपोस्तुपाश्चात्त्यावेत्या
यदभिप्रायेण द्विगुणविश्वोत्थापकत्वं मायाशक्तेरिति
मलद्वयलक्षणाययत्सूत्रंतदवतारयति इदानीमित्यादि
ना एतदणवेत्यादि पदेनाप्येवव्याचष्ट मंत्रेश्वरागम
प्याणवंमलंवदन्ते बोधानामपीति स्वेटीकायांतेनत
त्रैवसतिमलान्तरयोगः द्विप्रकारेसत्याणवमलेहेतौ
स्वरूपसंकोचेभिन्नस्ययत्प्रथनं तन्मायाख्यंमायया व्याप
स्वतन्मायीयंमलंसंज्ञामात्रेणेति मायाप्रकृतत्वंतुमलत्व
यस्यापि इत्यत्रैवश्लोकेतुर्यपादेनोक्तं तथाबोधरूपस्यकर्तृ
देहादेर्भिन्नवेद्यप्रथायांसत्यामहन्त्वमपिजडेष्वकर्मस्वनिमे
त्वावद्धात्माविपर्ययः जन्मनस्तुनियतावस्थादिमस्याप्य
षाभोगस्यचसर्वदुःखादेः कारणत्वंकार्ममलं माया
नामशक्तिः परमेशस्यसा सम्पूर्णविद्याशक्तिमणोर्बन्धन
क्ति ततोणुरन्तर्बहिरिन्द्रियाण्यधिष्ठायभिन्नवेद्यज्ञाना
ति नदायमणुर्मायाख्येनमलेनमलिन इत्युच्यते अतो
पीति नकेवलंपूर्वोविपर्ययः यथाणवमलात्माऽकः या
वदयमपीत्यर्थः तथेति पारमेश्वरागमेषु कथंसूचित
मित्याह इयमपीति अप्रसेत्याख्यायद्ग्रणस्यपुनःस्वात्रविशे

१५९

प्र·
भि वि
५८
517

षृतो मायया व्यपदेश इति दर्शयति हेतेत्यादि तथेति सा·
याख्ये तत्तत्प्रवोत्पत्तिक्रमेण मूलमूलत्वमस्यैव संविदात्मक
स्वरूपे तत्त्वादाणवमलस्य अत एव वेधीकरणमर्थान्नोम
लो माया च ख्यायते मूलमन्यत्त्वरूपाभावो वेद्यख्यापाणवो
मल इत्यत्र गुरुभिर्मूलमिति काकाक्षिवदपेक्ष्यमिति व्या·
ख्याते एतदेव स्पष्टयति हेतदर्शने चेति मुक्ताणूना
मिति संसारिणोत्तीर्णानां मन्त्रमहेशादीनामित्यर्थः
एवं संभवेदित्यनेन मुख्यतया माख्यमेव व्याख्यानम्
तद्रूपविस्पष्टीकरणप्रसंगात्तु मलद्वयमन्यत्त्रिरूपि
ते अभेदात्तु कार्म विहरणेति कर्मपराधीनत्वमिति
तस्य कर्ममलतायामास्पदं यतो विपर्याससामान्येन तस्यास·
त्यत्वे विपर्याससामान्यं तदिति उक्तमाह स्वातन्त्र्येति प्र
मातुः स्वातन्त्र्यरूपा क्रियाशक्तिरेव कर्म सैव तं यत एवं प
रतन्त्रीकरोति नियति याक्रमा येन विचित्रफलभाग्ययम
निकृष्टैरपि जायते ततो विपर्यासतेत्यर्थः प्रागिति कार्य
कारणभावविमर्शो वक्ष्यते इति देवादिष्वपि विज्ञानेन
बोधमात्ररूपत्वेन प्रकलाः कलोपलक्षिताशुद्धविद्याप्र
गादियोगाभावाद्भोगशून्या इत्यर्थः तदेव पादं व्याचष्टे
ते स्वेन दित्यादिना समासपदेन ।५८ अथैषां मलानां
विविक्तविषयप्रदर्शनेन तद्रूपस्फुरधित स्वातन्त्र्यहानिर्बो
धस्य त्वप्रख्याशस्य विषयमाह अबुद्धबोधात्मकत्वेपीति ये
संविन्मात्रपरमार्थोऽपि अहमिति स्वात्मविश्रान्तिलक्ष
ण स्वातन्त्र्यपरमार्थो मलश्चमत्कार इति यथा न योगाख्योम·
णः कर्तारत्वे भर्त्रा परमेश्वरेण प्रतिहत परिपूर्णस्वातन्त्र्य
णतया भ्रूभङ्गात्मनः सकाशाद्धरादिवदेवभिन्ना।

निर्मितायेन मन्त्रमहेश्वरादीनां भेदेन भांति परमेश्वराद्भेदे
हेतुः कर्तृतात्ययादिति परमेश्वरस्य चोक्तम स्वातन्त्र्यमयं·
त्वादित्याकूतशेषः श्रुणुक्षं शस्य कस्यचिदपगम एव तावद
न्तश्शुद्धत्वमशुद्धिघनतानिह्नवतरणानूपमिति व्याचष्टे बो
धेत्यादिना अनेनेति वेद्यानुपरक्तशाक्तेन कैवल्यं केवलता
उपाध्ययोग इत्येष एव परमार्थापवर्गः सांख्यादीनामि
ति कैवल्यपदेन पिशुनयति सोऽत्री पंचमी हेतौ व्याचष्टे तदे
तदित्यादिना नन्वीश्वरनिर्माणं किमिति तदपेक्ष्यते आह
ईश्वरनिर्मितिमिति स्वातंत्र्येत्यादि बहुव्रीहिः अतएवेति
यतोदृष्टमप्येतन्मुख्यस्वभाववियोजनाभासमुत्थापय
ति ततः स्वातन्त्र्यमयत्वमेव न तु कथंचिदप्यस्वतन्त्रता अत
विदश्यमतीतानादिष्ठायाः ननु स्वात्मनेव भगवान स्वातं
त्र्येणापि भातीति एवंविधं चेदस्योक्तम स्वातन्त्र्यं तर्हि भगव
स्वरूपात्मभिन्ना इति कथं एतत्परिहरति नैनैव चेति भगव
ताभिन्नग्राहकसमासवर्तिनि एतदेव स्फुटयति नहीति सहि
स्वतंत्रत्वेन भातीत्यस्यावाचोयुक्तौ यत्तथाभाने स्वतन्त्ररूप
तदंगीकृतमेवेत्यस्वतंत्रं तेनतोभिन्नमेवाभातीत्यायातं नैन्वेव
मस्वतन्त्रो भगवान्स्वातन्त्र्यं न स्यादेवनेत्याह सचापीति स्वा
तेऽप्यहानिरेवं स्यात् यदि परमेनमेवं ज्ञयात् नचैवम् तदाह
स्वयमिति नन्वेवमस्तु तस्ते विज्ञानाकलादयः परमेश्वरादभि
न्ना एव ततः कस्य तत्स्वातन्त्र्यमुच्यतां किं भगवत एव उततै
षामपीत्याशंक्याह सांख्यपुरुषादयास्त्विति यो हि तथाउ
भूपुर्न प्रतिहन्यते सस्वतंत्रः एतच्च भगवत एवास्ति तस्यैव
सर्वपूर्णत्वेन स्वामिन इच्छाकृतनयेनत्रभूपात्तत्तणायेच्छया

६
प्र वि
५१८
518

योगात् तथेत्यत्र त्वभागे ये वर्तन्ते घटादिवत्ते तदेतदाह भू
तादीति आदिपदाद्भुवनतत्त्वभावादिग्रहणं तत इति सां
ख्यप्ररूपाद्यः ननु तावदेते परमेश्वरप्रमातृतापेतया
भेदेन भान्ति घटादिवदेव नचास्मान्प्रतिते प्रकाशन्ते तत्
किमपेतयाते भिद्यन्तामित्याशंक्याह मन्त्रेश्वराद्यपेतये
ति तेहि तावत्तत्तोन्योन्यतो ग्राहकवर्गाश्च भेदेन पश्यन्ति य
द्यप्यस्मदादिप्रमातृणां अपिते आगमप्रामाणिकतया भेदे
न स्फुरंति तथापि सा तावत्कारमूलत्वेसाति आगमावभात
सर्वहि: सर्वसाधारणाभासनिष्ठता प्रत्यथात्तत्तंत्र वि
कल्याभासवदसाधारणत्वेव नवाह्यत्वमित्याशयेन मंत्रेश्व
राद्यपेतयेत्युक्तं तदेवाह तदागमसिद्ध इति एवं सति
आगमसिद्धास्ते भवंति नान्यथेति यावत् ॥ ५८ ॥ ननु का.
देनो रस्तु विज्ञानाकलानां परमेश्वराद्भेदोऽन्यत्र तु कथं बो
धात्मत्वेन स्वरूपभेदस्याभावात् देशकालभेदस्य च बोध
स्वभावं प्रत्यभेदकत्वात् तत्कथं ते इति वक्तव्ये तेषां निर्देशा
इति चोद्यं परिहर्तुमुक्तं बोधादीति बोधरूपता नित्यत्व
विभुत्वमित्यादिलक्षणं यद्यप्येषां न भिन्नं तथापीश्वरे
च्छायतस्तथा भिद्यते नित्यव्यापकबोधमात्ररूपो ह्ययं.
भेदेन निर्भास इति ततस्तेषां युक्त एवान्योन्यं भेदो ग्राह
कान्तरेभ्यश्च तेच प्रायस्ते विज्ञानमात्रैककर्तृतासूत्रं मायी.
यभेदावभासशून्यं येषां स्वभाव इत्येवं विज्ञानाकला इत्युक्ता
नचकाचिद्यदीश्वरेच्छा बोधमात्राण्यपि भेदवन्ति करोति तं.
हि बोधस्यैव प्रमातृत्वं ॥ भिन्नं घटादिवर्गं सर्वदा निरू
प्यताम् ॥

किंमूर्च्छादिदेहान्तान्तरालप्रमात्रन्तरकल्पनेनेति यत्तउक्त
मसकृदवभासमानमनपह्नवनीयमिति अवभातिचकृशो
हंक्षुधितोहंस्थविरोहंसवैगौरोहमिति देहप्राणादेः प्रमा
तृभावइतिसूत्रार्थमवतारयति अविच्छेत्यादिना भेदचे
त्कथंबोधादिरूपता साचेत्कथंभेदइति भेदेपरस्परंबोधा
दिलक्षणैक्येचपर्यन्तयोगोनैवकार्यः आदिपदेनसौत्रेण
नित्यत्वव्यापित्वादेः संग्रहइतिव्याख्यास्यंसूत्रउपयोगिनि
रूपयति बोधात्मनास्मीत्यादि नन्विति तथानिर्मोरोगाहिकिंच
नित्यतादिभवेत् अन्योन्याभेदाभासमात्रमेवनिर्माणनत
थिकं तदपरिनीलाद्याभासान्तरश्चवयेननीलादेरिवानित्य
ताभवेत् प्रकृतउपयोजयति बोधस्येति चकारेणाप्रमेय
प्रमुक्तित्वन्तुयन्नासिद्धतामस्यार्थस्याह पेयर्थादिसंविदःपू
र्णरूपमिति तदनाभासोप्युद्दिष्टेव तदाह नतुग्रहइतिस
म्पदर्शयति तेषामिति चोद्देतोनिषिद्धेति अहंकारहानित्वेन
तदभ्युपगमात् अस्येति पुरुषस्य उक्तमिति तैःसांख्यैरि
तिसंबंधः नतुसत्त्वेहानिगतंरूपंविधेयस्यानामप्यस्ति इति वि
शेषः ज्ञातः आह तेषामिति किंचित्त्वतन्त्राणामिति पराप
रहंपरस्वातन्त्र्याशानुगृहीता परस्वातन्त्र्यमुक्तानामिति याव
त्. अनागतावेतएलतलोनपूर्वापरपर्यालोचनेनतन्नुप
क्तितोविशेषलाभइति तात्पर्यम् ननुतज्जातीयेनतुल्यप्रा
यपदेनोपमानताकथमुच्यतेत्याशंक्याह लोकेप्रसिद्धेरिति
मायीयलोकोत्तरंपारमेश्वरंशासनेयत्नोपूर्वंलोकस्यतत्त्वादि
सम्यगागमितेसंवेदनेपरापरसिद्धिलाभः असम्यगापिगा·
णापन्नवैचित्र्यंनतुकथंचिदपिप्रमातृकतानातमस्त्वमिन्य

प्र
भि वि
५१८
519

त्यिपादयितो मायीयप्रसिद्धेनभुत्पादनीय इति प्रसिद्धत्वा
दृष्टान्तीकरणे तज्जातीयस्यापि यथायं गोर्मदीयदान्तशा
यएवेति शास्त्रभिरूपारमेश्वरमेव इदानीं तज्जातीयतां नि
वारयन्साक्षरूपमेव स्फुटयति सोऽस्त्वेवेति अमीत्विति वि
ज्ञानकेवलत्वं मायीयाभोगनतरणमात्रादेवपरयोजनिका
मृत्यादीतां विशेषाङ्गीनाङ्गुलकामेवं वेद्यवेद्यवन्ध्यकेवल
पुरुषस्वरूपभावनाबलात्तदन्नाधधारणाध्यानसमाधि
बलाद्वलभ्यत इति तल्लाभस्य भोगविशेष एव तत एवोक्तं
योयदाभिलषेद्भोगान्स तैर्वनियोजितः सिद्धिभाङ्मन्त्र
सामर्थ्यादित्यादि ततः सोऽत्वः पुरुषयोस्साक्षरूपत्वदासित
कं तज्जातीयतापर्यन्तं न भवतीति प्रायिकं साक्षरूपयुक्तं
एवं स्यात्तस्य हानिर्बोधस्येत्यन्तभागविज्ञानाकलेश्वरकाख्या
तेष्वस्याप्यबोधतेत्यस्य विषयमाह सूत्राद्यबोधरूपेति सू
त्रेण एतदवतारयति संगतिं ऊर्ध्वमेवमित्यादिना एकर
ति एकराशिकरणेनामितियावत् बोधात्मत्वादिबोधस्य
एतेषामहं विमर्शशून्यतामावभूतः ततः नचाबोपिन स्वभा
विनोप्यारोपोऽज्ञानएव एतदेव च युक्तमित्यभ्युच्चयहेतुमा
ह व्यतिरिक्तेति व्यतिरिक्तेति व्यतिरिक्तो बोधाद्दोषोया
वदहं विमर्शस्य विषयस्तावत्तस्य स्वयमप्रकाशमानः कथ
मरहमिति विमृश्यते स्वप्रकाशविमर्शाश्रयं ततः स्वप्र·
काशतयाप्यारोपितयाभवितव्यमेव एतत्परिहरति न
व्यापीति स्वप्रकाशताकासमारोपितावास्तव्येव नासोप्र
तिप्रसक्तैव तथापितत्पदस्तितस्वभावे वर्तते सा परप्रका
शात्वस्येदमिति वेद्यतारूपस्यताद्वस्थ्यात् ॥

१४५

तोनदाह बोधतातिरस्कारेणेति बोधतायत्तस्तिरस्कृता
ततएवंहन्ताउक्तं सोत्रमबोधपदंव्याख्याति अहन्तात्स्वद
स्वातंत्र्यरूपारोप्यमाणस्फुटेवव्यतिरिक्तत्वस्यविच्छिन्नता
लक्षणस्यधुंके करोतीत्येवंरूपस्यपारतन्त्र्यस्यचपरानुग्रहा
देवंकरोमीत्येवंलक्षणस्यस्वातंत्र्यविरुद्धस्यानवभासात् त
त्वज्ञानावनरसंपन्नयेहि यत्ततएवंभूतोवभासस्तस्याप्यमा
नोपिनोत्तिष्ठति ततोहमित्यंशेयास्वप्रकाशतासाविरुद्ध
परप्रकाशत्वात्मकवेद्यतापद्दत्तिनस्वरूपाइत्यबोधतोक्ता
यात्वविच्छिन्नतास्वतंत्रताच तद्वेबोधेसातद्विरुद्धविच्छि
न्नत्वपरतन्त्रतावभासनेनास्फुटाइतिकण्ठतोक्ता शून्या
देःप्रलयाकलार्थव्याख्यानबलादेवतेषामित्यादिसूत्रार्थो
व्याख्यानार्हइत्याशयेनाह प्रलयेत्यादिसर्गोत्थापकः
संस्कारःसर्गसंस्कारः वक्ष्यमाणन्यायेनेतिसंवेद्यमपवेद्य
चेत्यत्रव्यवस्थितविकल्पश्चायं तथाहि केचनशून्याद्येश
संज्ञचित्तसंविन्मयाअपवेद्यस्त्वशुभपदभाजः अन्येबुद्धा
द्विभागावरुद्धचिन्मयाः सुखादिशेषसामान्यवेद्ययो
गात्संवेद्यस्त्वशुभपदजुषः स्थूलकार्यकारणवियोगात्
मकंतत्प्रलयाकललक्षणमेषामेकमेवेति १९० एवं
स्वातंत्र्यस्याप्यबोधतेत्येतदंशाविषयाभिधानप्रसंगात्
कार्ममलस्यापिविषयोदर्शितः मायामलस्यापिपाति
कः अधुनाणवकार्मद्वयाभावेपिमायाख्यमलस्यकेव·
लोस्तिविषयइतिनिरूप्यतेस्वरूपेण बोधानामपीति
येचिन्मात्रमेवात्मतयाहमितिचमत्कारवन्तं पश्यतीति त
नएवाप्रतिहतज्ञानक्रियास्ततएवाणवमलवियोगि

प्र
भि वि
५२०

णः कर्मसंस्कारविकलाश्च संसारोत्तीर्णत्वान्नेव्यक्तिविकं
वेद्यकार्यंच प्रश्नपन्तोहितदर्शनांगीकृतेश्वरतत्त्वमायाख्यमल
लघुत्वाविद्यामेश्वरादयइतिसूत्रार्थः एवमवतारयति सा
तेत्यादिना कर्तृतायाभेदोवैचित्र्यमुक्तमकर्तृत्वाहितल
एयं प्रकारान्तरमिति प्रलयाकलगतत्वेन विकल्पनमु
क्तः प्रकारः ततोन्यत्तमाहेत्यर्थः प्रलयाकलात्मक
लाश्चनियत्यादीत्यनेनोक्ताकर्तृतेत्यादिना विज्ञानाक
लाइहत्युक्तः बोधयोगेन विद्यास्पर्शः कर्तृतयाचेश्वरता
इति विद्येश्वरत्वेपिइत्यत्रहृत्त्वावार्केदर्शितं तेनेतिमाया
ख्यमलेन यतोवेद्यादत्पृथग्भूततद्रूपता सदाशिवेश्वरावु
चितातिरोहिताषृथग्भावेनवावभासितातत इत्यर्थः शुद्ध
तत्रपराबलापिइत्येवदितिहृतिव्याचष्टे ईश्वराश्चेति चका
राद्भगवतोपि अतइति विहरणोतिपूर्णोत्यादिना प्रती
केनापिग्राह्यस्याभिन्नक्रमतां दर्शयन्नसंभाव्यमेषांतावद
णत्वंततत्त्वानापवलायातंभवेदपीत्येतद्द्योतयति ९०
अथमलत्रयस्य योगपद्येन विषयवक्तुं सूत्रं देवादीनां
चेति संक्षेपेणास्यार्थंस्पष्टः वितत्तस्तुटीकामेवोक्तः
तत्रावकारणमिति सामग्रीरूपतयाङ्गीणापिमलानि
संसारहेतवः अन्वयव्यतिरेकवशेनतत्त्वमुख्यतांकामीस्य
यति यथामिति चतुर्दशानामपिमुख्यत्वंव्याचष्टे विधेश्च
पदवत्यः अतएवकार्ममलस्यनिराकरणमेव ॥
मेत्यादिना कार्ममलस्याभावेसत्यवरेतोसंसरणसोपान

सांख्ययोगपुराणभारतनन्त्यनादौ यत्तेनोपदिश्यते य
तिरेकेति कार्यो मलस्ताभ्यां व्यतिरिक्तस्तदनाभिज्ञो न दृष्टः
नापि स्वकार्ये तो व्यभिचर्या प्रयोजकीकृत्य करोति तत्कार्य
स्यापि दर्शनात् प्रथवेति सपवार्थो भंगपन्तरेणोक्तः सुख
तोक्तो किं मूलं प्राह कर्मेति तेनैवैकेन संसाराख्येन प्रयोज
केन प्रयुक्ते तेमलेन भवतः संसारो नीरोगे नापि विज्ञानाकल
मेदेषु रादिलदणेन प्रयुक्तत्वं तयोरस्ति इति दीलादिनेति
पूर्वकृतकर्मवत्त्वाः शोषणमपवाधिरोहणा विरोधिकमेप्र
शमनमपरं भवति नदीलासमं किंचिदिति हि श्रीललि
नायां श्रीमद्गुरुभिरप्युक्तं कृतमपि फलायन स्यादीतोप
पूर्यिरोमवीजमिव बलाद्विशेषणस्तव्यतिकरजातं विहा
येकं इति तथाप्युच्यमाहतस्य भगवन्नित्यादिवशीकरणादि
वायत्यामंत्राः उच्यते नचतत्र रागद्वेषविदानरूपनाघपसा
रणे तेन विनापि रोगविरूढस्येव भेषजत्वात्तथा रागातां
नाघवाच्छन्दनापि मन्त्रेण बन्धशक्तिरपसार्यते ततो दे
षाः स्ववीजसन्तानादीतिनेप्यनिवारिता इत्यवाधकमू
पवं विभिन्निभिरेकद्विकभेदैरेकेन चत्रिकभेदेन सप्तप्रमात
विकल्पाः तेषामपि विकल्पसप्तप्रयोगारितादिना प्रसं
एषो भेद इति सूचितं १९२ मलत्रयप्रयोगपर्यलादितभवि
नात्मकसकलावस्थायाया पवोद्भवतिरोभावभेदेन द्वैथं प्र
कायितमुहूर्ततोता वदाह तूनेण कलोहलितमेतत्क्षेति दे
वादीनां यत्कार्ततां धाप्राधान्येन मलापहस्तिततवाधपद्रूपत
यात्वातं त्यात्मकं चितस्तत्वकलाशाल्याभगवत उद्दलितं
मलेनन्यकृतमपि समुद्गतवलंकृतं मूल्यादेर्देहान्तस्यसं

६
प्र वि
५२१
521

वेद्यितदप्रधानत्वेनस्थिते यस्मान्मिते इदन्तापतितदेहा
दिप्रमेयनिमग्नत्वेनप्रमेयं च संकुचितं च यो गौरोऽयः स्थूलो
यः पिपासितो यः सर्वाकारशून्यः सोऽहमिति हीदन्तैवेय
महन्ताविशेषणीभावेनभाविनी स्फुरति इयं सा प्रदा
दिप्रथमयी संसारदशेति सूत्रार्थः अस्यावतारणमाह सं
सारिण एवेति सकलस्यात्मनात्मनोः अहमिदंभाव
योरुपक्रमतेइति अनात्मप्राधान्यं तावदाहेति यावत् प्र
संख्यानवत इति समाहितमनसः जडस्येति लौकिकस्य च
दिवेति वैशेषिकात्मकल्पं नेहि गुणभूतान्धर्मे रूपाद्रा
गादीन्समवेतान्नित्यव्यापकस्वभावस्यात्मनश्छन्ति नि
र्मेयस्यापि भिन्नत्वं प्रकरणादशाहसृष्टमपि मन्तव्यं शि
ष्टमत्र स्पष्टम् ।१३ एवमुद्भवमुक्तान्यभूततामाह
सत्वेणमुख्यत्वमिति यदा पुनः कर्तृतायां मुख्यत्वे तमा
नातीयक एव च शून्यादेर्मेयताशास्यगुणीभावस्तत्र चावि
द्रूपे गुणीभूते स्वातंत्र्यस्याप्यवोधतेति योमलव्यापारो·
भूतेस्यापहस्तितांहो यस्यापि चिदात्मनश्चिद्रूपतायाः प्रधा
नस्वभावस्य मुख्यत्वे तदेतदज्ञानरूपमलमेतिहहितयास
मावेशलक्षणं सत्यस्वरूपे सम्यगासमंतात् अवेशलक्ष
णं ज्ञानं यत्र लाभन ज्ञानी यदभ्यासेन च देहप्राणादावन·
न्तं संविद्रूपात्मकविभवसमासादनायोगी भवति एतदु
क्तं भवति यदहंभावः स्वातंत्र्यादिशैवव्यापित्वनित्यत्वादि
परामर्शवलाच्छून्यादेः प्रमेयीकृतात्तज्जन्मादेर्वास्ते तदात्
यीतीनता तदापि च शून्यादिसंस्कारोपप्लीत्यव्यतिरेकतद्यो
तीनसमतैव यदा तु परामृष्टनित्यत्वव्यापित्वादिधर्मकेस्वयं
ह नात्मनाहंभावस्सिद्धरसेन शून्यादि॥

देहधात्वन्तेविश्रान्ते येनप्रमेयत्वात्तच्छ्वत इवतदातुर्यद॰
ग्रा यदापिविद्धोसोपाणदेहादिधातुः संविद्रसेनाभिनिवि
ष्टोत्यक्तकनकधातुरिवजीर्णः क्रियते येनसद्गुरुरसश्चवा
भातिकेवलंतत्संस्कारस्तदापितद्यातीतदशासाभवति सैव
हृद्यपिदशासमावेशः यत्राभायान्मड्पदिश्यते यहीतम
ग्यावेशपमनोयश्त्वपक्रम्याग्यावेशयितेचित्तमिति तसैव
चपहवभूताः परमेश्वस्तुतिप्रणामध्यानपूजादयः तेषा
हिमक्षीभावः स्वात्मगुणीकरणंपरमेश्वरूपप्रधानता:
पादनंतत्वं प्रभ्यासेप्यसमर्थः सम्यक्कर्मपरमोभवरूप्यादि
देहपातेत्वेकचनैवशिवतेति तदासमावेशाद्दिव्यवहारेण
काश्चिदिति सूत्रस्यपिण्डार्थः तमवतारयति तसैवेति सूत्र
हृमोः साम्यंकरोति पूर्वंतत्वेनादिना पूर्वंतत्वेनेतावत्कर्तृत्व
मुक्तेः तदेवदेहान्तस्थेनकेवलेनतस्यपूर्वंगुणतेत्यक्ता अग्रवत:
प्रतिपत्तभूताप्रधानता तत्रास्तीति षष्ठ्यास्तत्वे यद्गुक्तमू
नहुतेप्रथमानिर्देशेननिर्दिष्टस्यापिसूत्रादेः पश्चाद्गुण
ताप्रदर्शनेनविहृते नतुसाक्षात् नहिकर्तृत्वस्यप्राधान्यमि
तिहृतिरस्ति ननुसूत्रादेः पश्चाद्गुणीकरणंचेत्यातालना
द्विपकस्येतिनीत्याकिंपूर्वंप्रथमा निर्देशेनप्राधान्यंख्याप्य
तेयाह विचार्यमाणतेति तन्नावदिहप्रकृते विचारणीय
मितिप्रधानेमुख्यतागुणतेति तन्टेष्टविचारस्यशरीरमि
त्मर्थः ननुसाक्षादेवकर्तृत्वस्यप्राधान्यंमुहृतोकिंनदर्शितं
किमनयाभंग्या आह कर्तृत्वेति कर्तृतायामुख्यत्वे सूता
देवधंपगुणता तस्यतमुख्यत्वेनतस्याइत्यनयाहम्याप्रति:
यादितेतत्लानन्तमनतिन्यायोलभ्यते यथाहिहतिरवधंप

६
प्र वि
५१२
522

सूत्रार्थमनुसरन्तीकर्तव्येति योजना। एवंभूतो न्यायः प्रतीय
ते किमनेन प्रतीयते तदाह पूर्वसूत्रे कर्ता हि लिनमित्यत्र शून्या
देः गुणत्वप्रतिसम्बन्धित्वनिर्देशेन प्रधानत्वं यदर्थापन्नं तदु
क्तेन प्रकटीकृतं भवेत् अनेन तु न्यायेन दर्शितेन प्रकटीकृ
तमेव भवति पूर्वसूत्रे हि तो कर्तृत्वस्योपसर्जनत्वं तावत्कण्ठे
नोक्तं तदानन्तरीयकत्वेन च शून्यादेः प्राधान्यावगम इति
न्यायात् प्रधानत्वं यच्छून्यादेरुक्तं पूर्वसूत्रे तदर्थापन्नम्
गुणत्वं तु यदुक्तं तदिह सूत्रे स्वकंठेनोक्तमिति तु शब्दो वि
शेषद्योतकः इहत्विति ननु गुणत्वे सत्यस्य प्रथमानिर्देशे
न हेतो विद्यते अथ किमर्थं प्रथमया विहित आह प्रधान
तयेति स्वतन्त्रबोधरूपता तावत्सदैव प्रधानभूता स्थिता
सा तु शून्यादेः प्रधानतावभासेन पूर्वसूत्रेर्थापन्नेन न्यक्कृ
ता ततः सैव प्रधानत्वमनुभवति साक्षान्मज्जतीति प्र
थमानिर्देशमाह सैव शून्यादिरात्मनः प्राधान्याप्राधा
न्ये स्वीकुर्वाणा एवं करोतीति द्विनस्य प्राधान्याप्राधान्ये
संसारभूमौ पशुत्वे पतित्वे च दर्शितं भवतीति प्रागुक्तनय
मेव स्मारयति यदाहीति स्वतन्त्र इति स्वतन्त्रबोधो नाम
बोधरूपोहमिति योगीयते सकड इति चिन्तायां यदा दे
हादिनानुरूपं पूर्यते योगोरः सोहं यः तु थिनः सोहमि
त्यादि तदा देहादिरेव प्रधानीभवति संवित्स्वरूपं न्यक्कृते
ज्ञातमिति वेद्यमेव प्रधानीभवति न वेदकरूप यदा तु देहा
देः किं तत्त्वमिति चिन्तोपक्रमं प्रकाशनमेव संविद्रूपमिति
तदा बोधस्वरूपीकृतं तदस्माद्विद्धमेव शून्यादिदेहान्तमेव भाती
ति अभ्यासात् स्वसंविद्धमोक्षकि विशेषाः सम्यगाविष्टो ना वि
ती रूत्यापयति अनभ्यासपतितन्त्वेशापवानेन दोद्वक्रम
निहायामिन्नपञ्चार्पाविभावनकमेण।

प्राप्तेपिसिद्ध्यन्तिनास्यत्रविवा
जीवन्मुक्ततालाभो यथोक्तं
दइत्यादि मेघापरमार्थवधेरीदेत्युक्तं इयंनिर्वाणादीक्षा
चेतिगुरुभिः भगवतापिचपवंवेति तत्वेन तस्यनिर्वाणमा
मिनी दीक्षाभवत्यसन्दिग्धातिलाग्यागृतिवर्जिता इत्यले
तावदनेन तदाह स्वात्मादौवोधोध्यारोप्यतेइति नचकेवलमूल
इवशीर्षीणामयमध्यारोपइति दर्शयति तेनकर्त्रात्वेनताव
दयत्नवशादेकीभूतंस्वात्मादिपयात्स्थितं तत्रैवेवकर्तृताहा
रेणदेशकालधर्माकारानवच्छिन्नवोधस्वभावत्वमतीति
तल्लक्षणीयाभिमुख्येनतनिवेशयते प्रमितिवेशयेत प्रमिति
वेशपूर्वकंप्राप्यतइति द्विकर्मकंवा तथाभिनिवेशयमा
नेविश्वात्मकत्वंयतोवोधस्यततस्तदपिस्वीकारोतितदा
त्मानमिति शास्त्रसंस्कारनिहृतेरावेशपावेशकभावोपुत्रकस्य
भावेशविशेषः तावत् विशेषदर्शनेधितिशाक्ताद्देतप्रधानेश्विवि
त्रिकालतस्यात्मनोदर्शयते सातात्कारनीयते येऽपुस्तानां
स्वासइति अज्ञानविगमादद्वयवोधप्रसरणादुल्लासइति
तानमिति विहृतं तुर्यति एतद्दशासमापत्तिपर्यन्तत्रूपापि
तुर्यातीत तत्रानचैवोक्ताव्यतिरेकेणतस्यदेवस्यापनेवोध
स्यतुर्यातीततानचैवोक्ता स्वात्मता निष्कलताप्युक्ताचेत
न्यमितिसामान्यदर्शनेषु सर्वाणीरूपकंतत्रपवेदकेषुदर्शि
तेति सूचयति ननुसूत्रेपूर्वत्रेहचकर्तृतायोपवणणप्रथा
नभावोवक्तव्यो तदाशंकितंवोधस्यचेतितत्त्वांशाःकथं
कर्तृमयतामापन्नस्येतिचहन्तावुचितायांवोधमयतामिति
किमेतदित्याशंकोक्तमेवमप्रमेयमेतत्समाधानेसंदेहेपरिण
तःपरामर्शपण्हन्तकरोति यदुक्तं मयैव प्रत्यवमर्शहेतोःस्व

६
प्र वि
५२३
523

नेदमुक्तं तदेव चेत्यं विहृतमिति संबंधः ९८ नन्वेवं परस्
तुर्यदशा तदतीता वास्तु एषोस्तु शुभमस्य प्रमत्तायद्दशाग्रा
गमेषु यावेशावरोहणाक्रमतारतम्येन दर्शिताः तासां रू
पं वाच्यमिति हृदि गृहीत्वा तुर्यावरोहानन्तरभाविनः सु
शुभमस्य श्लोकद्वयेनानन्तनिरूपयन्नेकेन प्रथमस्य शुभमस्य ता
वत्पीठबंधं करोति शून्य इति पीठबंधमेव टीकाकारो दर्श
यिष्यति सोऽप्रमत्तभयरूपमित्यादिना तृतीयश्लोके यद्
